[illegible]



5929

Introduction + I, only

Part — 1st

F — 1

missing 1 — 6 —

Part 2nd F — 89

Part 3rd 107

4th — 5

5th — 11

6th 2

135


सं. १४ [illegible]

श्री [illegible]

[illegible]


Total F — 135

Complete



रामसिं [illegible]

रामसिंहज्यो



पत्रे सूचीपत्र

श्रीगुरवे सा विकायै नमः हेरंबं क्षेत्रपालं च
वागीशं वटुकं तथा श्रीगुरुं नाथमानंद भैरवं
भैरवीं परां १ प्रणम्य संविन्मार्गस्था नागमज्ञा
न्युनूत्तमान् प्रायश्चित्तं प्रवक्ष्यामि सर्वतंत्राविं
रोधतः २ साधकानां च पुत्राणां दीक्षितानां शि
वागमे योगिनीवीरमेलापे प्रमादः स्खलनं ख
लु ३ मनसश्चंचलत्वाच्च सत्वहीनेन यापि च
कामिनीनां च संसर्गात् कर्महीनाश्च कालतः ४
प्रायश्चित्तविहीनानां फलभोगाय केवलं सर्व
साक्षी महादेवो नरकान् सृजति प्रभुः ५ तस्मा
त्सर्वप्रयत्नेन प्रायश्चित्तमिहैव तत् कृतस्य क
र्मणः कुर्या दनुतापो भवेद्यदि ६ प्रामादिकम
हादोष प्रविलायनकारणं प्रायश्चित्तं परं स
त्यं श्रीगुरोः पादुका स्मृतिः ७ यस्य श्रीपादरज
सा रञ्जिते मस्तके शिवः रमते सह पार्वत्या
श्रीगुरोः पादुका स्मृतिः ८ यो मोहतमसाक्रा
न्तं मुह्यते देयहृत्पतः केवलं कृपया नाथ स्त
स्य श्रीपादुका स्मृतिः ९ यस्य त्रैलोक्यमखिलं
सच्चिदानंदलक्षणं स्फुरति स्वगुरोः शक्त्या त
स्य श्रीपादुका स्मृतिः १० यस्मै सर्वं स्वमात्मान
लो

ॐ ८

6

मध्येकीकृत्यभक्तितः समर्पयतितच्छिष्य स्तस्य
श्रीपादुकास्मृतिः ११ यमाश्रित्यात्मविज्ञान संवि
देस्मगयामहे हेतवेकेडःखितामूर्त्तो स्तस्यश्री
पादुकास्मृतिः १२ यस्मिन्सृष्टिस्थितिध्वंस पिधा
नानुग्रहात्मकं प्रकाशतेपंचकृत्यं तस्यश्रीपा
दुकास्मृतिः १३ मूलेहृदिललाटेच द्वादशान्तेप
रःशिवः यस्याज्ञामात्रमापन्न स्तस्यश्रीपादुका
स्मृतिः १४ यत्पंचतत्त्वभेदस्य पशोःपाशविमो
चनं यमाहुःशांभवीवाच स्तस्यश्रीपादुकास्मृतिः
प १५ यस्यपादतलेसिंधुः पादाग्रेकुलपर्वताः गुल्फे
नक्षत्रवृंदानि तस्यश्रीपादुकास्मृतिः १६ वन
स्पतिस्तथारोमाणि शातेरुद्राश्चजंघयोः जान्वोश्च
हेत्रसंदोह स्तस्यश्रीपादुकास्मृतिः १७ ऊर्वोश्चसि
द्धवीरेन्द्रा लिंगमूलेचभैरवाः लिंगाग्रेस्मरसोय
स्य तस्यश्रीपादुकास्मृतिः १८ आधारेपरमाशक्ति
र्नाभिचक्रेरुद्रास्तयोः योगिनीनांचवृंदःपृष्ठे स्तस्य
श्रीपादुकास्मृतिः १९ हृदयेमातरःकंठे शिरः
पीठोपपीठयोः चिबुकेयस्यदेवाश्च तस्यश्रीपा
दुकास्मृतिः २० यस्याःकपोलयुग्मेच जिह्वाग्रेचस
रस्वती यस्यदंतेमंत्राश्च तस्यश्रीपादुकास्मृतिः २१

स्कंधेचखेचरादेवा नेत्रेचतेजसांत्रयं लिंगत्रयंललला
टेच तस्मैश्रीपादुकास्तुतिः २२ इडापिंगलयोरंतर्ग
च ङ्गायमुनातथा मध्येसरस्वतीयस्य तस्मैश्रीपादुका
स्तुतिः २३ शुक्लरक्तपदद्वंद्वं मस्तकेयस्यराजते शां
भवंचतयोर्मध्ये तस्मैश्रीपादुकास्तुतिः २४ गुरुः
शिवोगुरुर्विष्णुः गुरुर्ब्रह्मागुरुःपरः गुरुरग्निर्गुरु
रिन्द्रो मातुरिद्रस्तथैवच २५ यन्यत्सर्वंसमुद्रपंचे नि
ष्प्रपंचागुरुस्तुतिः तस्माछ्रीपादुकाध्याने सर्वपाप
ल निकृंतने २६ पापेनाडुरितछेदात् कामितार्थप्रपू
रणात् पादुकाशब्दमात्रार्थं विम्रष्टस्मृर्धि पूजयेत्
२७ इतिशास्त्रार्थसंकेत रहस्यंकुलशासने शाक्तु
ल्लासवशाडुक्त मस्माभिर्गुर्वनुग्रहात् २८ श्रीगुरोः
पादुकास्तोत्रंप्रातरुत्थाययःपठेत् नश्यंतिसर्व
पापानिवह्निनातूलराशिवत् २९ पठितव्यंप्रय
त्नेन श्रोतव्यंभक्तिशालिभिः भोगमोक्षार्थिभिस्त
स्मा त्साङ्गिरागमपारगैः ३० इतिगुरुपादुकास्तुतिः
समाप्ता ॥


श्री रणवीर पुस्तकालय
मंदिर श्री रघुनाथ

पं॰ ट॰ १

ॐ नमो भगवते शिवमूर्तये नमः श्रीदेव्युवा
च ॐ भगवन्सर्ववेत्तात्वं जगतामुपकारकः
देवादिदेव देवेश त्रैलोक्याभयदायक शाक्त
रामरसंग्रामे मह्यं दत्तो वरस्त्वया तदद्य कृपया
शंभो संप्रदातुं त्वमो भव श्रीभैरव उवाच देवि
सत्यं वरो दत्तो देवदानवसंगरे यत्ते मनसि स्थमी
हितं तत्त्वं वदस्व सुव्रते १ श्रीदेव्युवाच भगव
न्सर्वधर्मज्ञ सकलागमपारग देवदेवी महा
देवी महात्रिपुरसुंदरी ५ त्रिकूटा षोडशी देवी
श्रीविद्या ब्रह्मरूपिणी तस्याः पंचांगमखिलं
सारात्सारोत्तमोत्तमं ५ वद श्रीघ्रं महादेव य
द्यहं प्रेयसी तव श्रीभैरव उवाच लक्षवारसह
स्राणि वारितासि पुनः पुनः देवदेवि महादे
वि पुनस्त्वं परिपृच्छसि अद्याहं कृपया देवि त
व प्रीत्या महेश्वरि महात्रिपुरसुंदर्याः पंचांगं
तं ब्रवीम्यहं श्रीविद्या त्रिपुरा देवी जगच्चैतन्य
रूपिणी त्रिकूटा षोडशी विद्या महाश्रीषोडशा
क्षरी ५ या देवदेवी जगतां सृष्टिस्थितिलयात्मि
का सा महाषोडशी विद्या महात्रिपुरसुंदरी ५
राज्यं देयं शिरो देयं देया संपत्तदार्थिने वसुपू

णीमहं देयं न देया षोडशाक्षरी ११ गोप्यं गोप्य
तमं विद्यां गुरोश्च शत जन्मनः गुह्याति गोप्यं
गोप्यं सा साधकाग्रेन गोपयेत् १२ त्रिपुरेशी
महाविद्या प्रभाव महिता कलौ अवस्था रूपि
णी विद्या बाला युवति प्रौढिकाः १३ अक्षरी त्रि
पुरा बाला प्रौढा पंचदशाक्षरी देवी त्रिकूटा श्री
विद्या महाश्री षोडशाक्षरी १४ महाश्री षोडशा
क्षर्याः पंचांगं वच्मि सादरं महाश्री षोडशाक्ष
र्या मंत्रोद्धारं ब्रवीम्यहं १५ यंत्रोद्धारं तथा ध्याने
प्रयोगान् श्च वच्म्यहं यथा लक्ष्मीपरा मदनवा
ग्भवशक्ति युक्ता तारं च भूतिकमला कथिता
पि विद्या शक्त्यादिकेन विपरीततया च प्रोक्ता
श्री षोडशाक्षर विधिः शुभदोऽस्तु पूर्णः इति मं
त्रोद्धारः अस्याः श्री षोडशाक्षर्या अन्यदोषो न
विद्यते मंत्रोत्कीलन दोषो वा मंत्रसंजीवन
स्य च संपुटस्याविना देवि पुरश्चरण कर्मणा
गुरुहस्तेन वा देवि साधकस्य करेण वा पुर
श्चर्यां प्रकुर्वीत वर्णलक्षं जपावधि न कदा
चित्त कुर्वीत स्वहस्तेन च साधकः न तिथिर्न
च नक्षत्रं नांगन्यास स्त्रमे त्रिणां न वारदोषो

प॰ ९२
2

नोविघ्नो नाशौचंनियमोनच साक्षादस्यतनूपोयं
मंत्रः श्रीषोडशाक्षरः ऋषिःस्या दक्षिणामूर्तिः पं
क्तिश्छंदउदाहृतं देवताचमयाप्रोक्ता महात्रिपुरसुं
दरी लक्ष्मीबीजंपराशक्तिः कामराजस्तुकीलकं
चतुर्वर्गेषुविद्यायां विनियोगः प्रकीर्तितः यंत्रो
द्धारंप्रवक्ष्यामि सर्वाशापरिपूरकं सर्वसंमोहनं
यंत्रं सर्वसिद्धिप्रदायकं अथयंत्रोद्धारः विंदुत्रिको
णवसुकोणदशारयुग्म मन्वस्रनागदल संगत
षोडशारं हृत्त्रयंचधरणीसदनत्रयंच श्रीचक्र
राजउदितः परदेवतायाः इति अथध्यानंप्रवक्ष्या
मि सर्वतंत्रेषुगोपितं सारंत्रिपुरसुंदर्याः सर्वस्व
ममपार्वति येनध्यानेनब्रह्मांड कटाहांतविली
यते उत्तप्तहेमरुचिरांरविचंद्रवह्नि नेत्रांधनुःश
रयुतांकुशाकाशपाशान् रम्यैर्भुजैश्चदधतीं शि
वशक्तिरूपां कामेश्वरींहृदिभजामिधृतेंदुलेखां
इतिध्यानं अनेनध्यानमात्रेण ब्रह्मविष्णुहरःशि
वे ब्रह्मादयःसुरगणा जातानिस्पंदचक्षुषः क
थयाम्यद्यदेवेशि स्तंभनादिविधिंपरं यंविधाय
महेशानि साधकोयोगवान्भवेत् स्तंभनंमोहनं
चैव मारणाकर्षणेतथा वशीकारोच्चाटनको

शांतिकं पौष्टिकं तथा संतानिकं मौक्तिकं च प्र
योगादष्टाकीर्तिताः स्तंभने रविवारे तु स्नात्वा
जपान्महेशिवे यमुच्चार्य भवेन्नृणां स्तंभनं त्व
रितं कलौ तारं रमां परं तारं कूटत्रयमुदीरयेत्
तारं परं रमां तारं फट् स्तंभनकरो ह्ययं प्रकाशः
ॐ श्रीं ह्रीं ॐ कएईलह्रीं हसकलह्रीं सकलह्रीं
ॐ ह्रीं श्रीं ॐ फट् ॥ गतेः सूर्यस्य चंद्रस्य वह्निवा
तादिपायसां रिपुसैन्यादिदस्यूनां स्तंभनं जाय
ते ध्रुवं इति स्तंभनं रवौ स्नात्वा नदीतीरे जपेन्मू
लं महेश्वरि यस्योच्चारणमात्रेण मोहमेष्यति
भैरवः तारं कामः शारं तारं कूटत्रयमतः परं
शारं कामं पुनस्तारं फट् मोहनमन्त्रः स्मृतः
प्रकाशः ॐ क्लीं सौः ॐ कएईलह्रीं हसकहल
ह्रीं सकलह्रीं सौः क्लीं ॐ फट् देवानां च नरेशानां
स्त्रीणामप्सरसां तथा सद्योदर्शनमात्रेण मोह
नं जायते ध्रुवं इति मोहनं रवौ श्मशाने मंत्रस्य
जपं कृत्वा महेश्वरि आनीय भस्म मुष्टिं च क्षि
पेच्छत्रुगृहे पथि सप्ताहान्म्रियते शत्रुः साध
कस्य न संशयः तारं कालीचकूर्चं च त्रिकूटाप
दमुच्चरेत् कूर्चं कालीं तथा तारं फट् मारणम्

प॰ ३

3

नुः स्मृतः ॐ क्लीं ह्रूं कएईलह्रीं सकलह्रीं ऐं क्लीं ॐ
फट् ॥ नृपो वा नृपमत्यो वा विप्रो वा क्षत्रियोपि
वा शत्रुः कालसमानोपि स्तुमेष्यति भैरवि ०
रवौ मंत्रं जपेत् प्रातः कामी साधकसत्तमः रंभाय
सरसां देवि भवेदाकर्षणं तथा तारं मारं वाग्भवं
च कूटत्रयमुदीरयेत् तं दं मारं तथा तारं फडाकृ
ष्टिमनुः स्मृतः ॐ क्लीं ऐं कएईलह्रीं हसकहल
ह्रीं सकलह्रीं ऐं क्लीं ॐ फट् प्रकाशः अस्योच्चार
णमात्रेण सद्यः आकर्षणं भवेत् रंभा स्वर्गस्थिता
वापि प्रातः प्रादुर्भविष्यति रवौ मध्याह्नसमये
स्नात्वा मूलं जपेच्छिवे जगद्वशीकृतं वशं याति त्रै
लोक्यं सचराचरं तारं परां स्मरं तारं कूटत्रयमहे
श्वरि तारं स्मरः परां तारं फट् वशीकारकः स्मृतः
ॐ ह्रीं क्लीं ॐ कएईलह्रीं हसकहलह्रीं सकलह्रीं
ॐ क्लीं ह्रीं ॐ फट् अस्योच्चारणमात्रेण देवाश्चापि
महेश्वरि सद्यः किंकरतां याति किं पुनः क्षुद्रभू
मिपाः इति वशीकरणं रवौ गत्वा श्मशानं तु
जपेन्मंत्रं महेश्वरि यज्जपेन भवेच्छत्रोरुच्चाट
नमरिंदम तारं लज्जां पाशं कामः कूटत्रितयमु
च्चरेत् कामः शक्तिस्तनं तारं फडुच्चाटनके स्मृ

तः ॐ ज्रु सौं क्लीं कएईलह्रीं हसकहलह्रीं स
कलह्रीं क्लीं सौः जु ॐ फट् दशवारञ्जपेन म
न्त्रेण परमेश्वरि रिपुमुच्चाटयेद्देवि साधको भोम
मप्रिये इत्युच्चाटनं खीजपेन्मन्त्रं देवि दशवा
रं यथाविधि त्रिवारं सर्वरोगानां सद्यःशान्तिर्भवि
ष्यति तारं शारत्नं रोकान्तं कूटत्रयं समुच्चरेत् का
मःपराशारत्नारं फट् शान्तिककरः स्मृतः ॐ सौः
ह्रीं क्लीं कएईलह्रीं हसकहलह्रीं सकलह्रीं क्लीं
ह्रीं सौः ॐ फट् रोगाणामतिवृष्टीनां ग्रहाणां ज्वर
वंदिते उपद्रवस्य सर्वस्य सद्यःशान्तिर्भविष्यति
इति शान्तिकं खौं स्नात्वा जपेन्मूलं दशवारं महे
श्वरि पिपासाकितदिग्भावे महावृष्टिः प्रजायते
तारं मारं स्मरं स्मारं कूटत्रयं महेश्वरि तारं स्मरं मा
रन्तारं फट् पौष्टिककरो स्मृतो ॐ क्लीं क्लीं ॐ कएई
लह्रीं हसकहलह्रीं सकलह्रीं ॐ क्लीं क्लीं ॐ फट्
दुर्वेलानां नराणां च पितॄणां च दिवौकसां सकृ
दुच्चारमात्रेण महावृष्टिः प्रजायते इति पौष्टि
कम् खौं जपेन्मन्त्रं देवि साधको देवतागृहे येन
जपेन वै च्छाया भवेत्सत्रो न्वयेश्वरः तारं शारच्छ
रन्तारं कूटत्रितयमुच्चरेत् तारं शारच्छरन्तारं फट्

पं ४
५

चसंतानिकोमनुः प्रकाशं ॐसौः सौः ॐकएईल
ह्रींहसकहलह्रींसकलह्रींॐसौः सौः ॐफट् वंध्या
याःकाकवंध्या मृतप्रजाः महेश्वरि पुत्राभवंतिभूमी
शाः स्वकुलैकप्रदीपकाः इतिसांतानिकं रवौप्रात
र्जपेन्मंत्रं तत्वरूपं महेश्वरि यस्योच्चारणमात्रेण
मौक्तिकंजायतेध्रुवं तारंरमारमातारं कूटत्रयमु
दीरयेत् तारंरमारमातारं फट्मौक्तिककरोत्ययं
ॐश्रींश्रींॐकएईलह्रींहसकहलह्रींॐश्रींश्रींॐफ
ट् इतिमौक्तिकं इदंहिममसर्वस्वं रहस्यंत्रिदिवौक
सां गोप्यंगुह्यतमंदेवि नप्रकाश्यंकदाचन इतिद
शप्रयोगाः अथुनादेविवक्ष्यामि पूजापटलमीश्व
रि श्रीदेव्याःषोडशाक्षर्याः पूजांमानसिकींचरेत्
श्मतके श्मतकेवापि पथिकांतारमंडले म्लेच्छभूभो
चकारायां संकटेरणमंडले मनसैवचरेत्पूजां त्रि
कूटायाम्महेश्वरि शृणुत्वंभक्तिभावेन यथावद्वर्णि
तेमया उत्थायशयनादेवि ब्राह्मेदिव्येमुहूर्तके
प्रक्षाल्यमुखहस्तांघ्री नाचम्यत्रिर्महेश्वरि प्राणाया
मत्रयंकृत्वा गुरुंध्यात्वासशक्तिकं देवीकामेश्वरांको
प विद्याकामेश्वरींस्मरेत् ध्यात्वापूर्वंगाषड्दीर्घं न्या
संकृत्वायथाविधिः जपेन्मूलंचगायत्री गुरवेचसम

र्पयेत् ग्रामात्पवहिरोंकारं जपन्नारण्यमूमिष्ठु त
त्रमूत्रादिसंत्यज्य वर्णोक्तंशौचमाचरेत् रमावीजे
नसंशोध्य दंतान्साधकसत्तमः मायावीजेनगं
डूष त्रयंकुर्यान्महेश्वरि मूलेनदेवितीर्थानि त
दावाह्यस्वसिद्धये ॐगंगेचयमुनेचैव गोदावरि
सरस्वती नर्मदेसिंधुकावेरि जलेस्मिन्सन्निधिंकु
रु इत्यावाह्यमहादेवि देवीमावाहयेत्ततः मूलेन
त्रिःसमुत्सृज्य नद्यंवसि महेश्वरि ततोमूलेजपे
न्मंत्री गायत्रींचविशेषतः सूर्यायार्घ्यंत्रयंदद्या दे
वदेवोस्तथैवच ॐत्रिपुरेदेविविद्महे आदिकूटम
मन्विते कामेश्वरिधीमहिच द्वितीयकूटमुच्चिते
त्रितयकूटपूर्वंच ततःक्लिन्नाप्रचोदयात् प्रका
रो कएईलह्रीं त्रिपुरेदेविविद्महे हसकहलह्रींका
मेश्वरिधीमहि सकलह्रींततःक्लिन्नाप्रचोदयात्
इ जलादाकृत्यवासांसि परिधाय्यचसाधकः सं
ध्यांस्तुमनसाकृत्वा वाद्यमर्षणपूर्वकं संध्यां
निर्वर्त्यदेवेशि यागगेहंततोव्रजेत् ततोद्वारा
र्चनंकृत्वा कुर्यादासनशोधनं भूतशुद्धिंततः
कृत्वाप्राणार्पणाविधिंततः षोडशान्यासभागेन
देहंदेवमयंचरेत् मनसावर्णभागोक्तं श्रीच

प॰ द 8

ततप्रसूनकैः धूपदीपादिभिश्चैव नैवेद्यैश्च मनोहरैः
तथाश्रीवटुकायापि दद्याद्बलिमनुत्तमं दत्वादेवेपु
नर्देवि नैवेद्याचमनीयकं तांबूलछत्रचामरादर्श
कादीन्निवेदयेत् संक्षोभद्रावणाकृष्टि वशोन्मादनम
ऊशाः खेचरीवीजयोन्याख्या नवमुद्राः प्रदर्शयेत् सौ
भाग्यवीजन्यासेन स्वदेहं व्यापयेच्छिवे देव्यग्रेचजपेत्कृ
त्वा पाठंकुर्यात्ततः परं वर्मसहस्रनामात्र स्तोत्रराज
स्यपार्वति शिवशक्त्यो महादेवि जपंतत्समर्पयेत्
गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतंजपं सिद्धिर्भ
वतु मेदेवि त्वत्प्रसादान्महेश्वरि गणेशायहृतनत्वत्र
योगिनीराशिरूपिणि ध्यात्वात्मासंवरेदेवि देवदेव्यौ
विसर्जयेत् प्रातःप्रभृतिसायांतं सायादिप्रातरंततः
यत्करोमिजगन्मातस्तदस्तुतवपूजनं संहारमुद्रया
देवि देवदेव्यौविसृज्यच स्वयंसदाशिवोभूत्वा शिव
शक्तिस्वरूपकः त्रैलोक्यंसाधकोदेवि स्वंखेचविहरे
दिति प्रयोगांश्चैववक्ष्येहं मष्टौपर्वतनंदिनि उपवा
रंववीमध्य नवाख्येयंडरात्मने स्तंभनंमोहनंचैव
मारणाकर्षणेतथा वशीकारंतथोच्चाटंशांतिकं
पौष्टिकंतथा एतेषांसाधनंवक्ष्ये जगतांहितका
म्यया सभक्त्वायनदातव्यं नदृष्टव्यंकदाचन स्वात्तुम्यायशयना

र्पयेत् आगत्य वहिरोंकारं जपनारायणमूमिषु त
त्रमूत्रादि संत्यज्य वर्णाकं शौचमाचरेत् रमावीजे
न संशोध्य दंतान्साधकसत्तमः मायावीजेनगं
डूष त्रयं कुर्यान्महेश्वरि मूलेनदेवितीर्थानि त
दावाह्य स्वसिद्धये ॐ गंगेचयमुनेचैव गोदावरि
सरस्वती नर्मदेसिंधुकावेरि जलेस्मिन्सन्निधिंकु
रु शप्पावाह्य महादेवि देवीमावाहयेत्ततः मूलेन
त्रिःसमुत्सृज्य नद्यंवसि महेश्वरि ततोमूलेजपे
न्मंत्री गायत्रीं चविशेषतः सूर्यायार्घ्यत्रयंदद्या दे
वदेवोस्तथैवच ॐ त्रिपुरेदेविविद्महे आदिकूटम
मन्विते कामेश्वरिधीमहिच द्वितीयकूटभाषिते
त्रितयकूटपूर्वंच ततःक्लिन्नाप्रचोदयात् प्रका
शं कएईलह्रीं त्रिपुरेदेविविद्महे हसकहलह्रींका
मेश्वरिधीमहि सकलह्रींततःक्लिन्नाप्रचोदयात्
र जलादाकृत्यवासांसि परिधाप्यचसाधकः सं
ध्यांमूमनसाकृत्वा वाचमर्षणपूर्वकं संध्यां
निर्वर्त्यदेवेशि यागगेहंततोव्रजेत् ततोद्वारा
र्चनंकृत्वा कुर्यादासनशोधनं भूतशुद्धिंततः
कृत्वाप्राणायामविधिंततः षोडशान्यासभागेन
देहंदेवमयंचरेत् मनसावर्णभागोक्तं श्रीच

प॰ ५
5

ऋं तत्र भावयेत् बिंदुत्रिकोणवसुकोणदशारयुग्म
मन्वस्रनागदलसंगतेत्यादि प्राक्क्रमम् विभाव्य तत्र श्री
चक्रं हृदये साधकोत्तमः योगपीठं ततोभ्यर्च्य हं सं यं
रं लं वं इति बिंदौ कामेश्वरं कोणप्रविष्टां कामेश्वरीं समे
त् पात्राणि स्थापयेत्तत् त्रिकोणे जलनिर्मिते चतुर
स्रमंडलेच विधायगंधकादिभिः सामान्यार्घ्यं त्रिकूटा
या मंडलं पूजयेच्छिवे चतुरस्रं मंडलं च समभ्यर्च्य व
रेत्ततः ॐ अस्त्राय फडित्येवं संस्थाप्यात्र त्रिपादिकां
तत्रास्त्रक्षालितं शंखं समभ्यर्च्य तथा सुधीः तत्रा
र्कमंडले देवि सोमवह्न्योश्च मंडलं संपूज्य मूलमंत्रे
ण कलास्तेषां समर्चयेत् मूलाष्टमंत्रितं देवि विधा
य तीर्थवारिणा तेनापूर्य शिवे शंखं शंखमुद्रां निवे
श्य च तीर्थमावाह्य देवेशि मुद्रं तत्रैव भावयेत् सामा
न्यार्घ्यस्य वामे तु शोभितं कलशं शिवे अस्त्रं चैव षड
स्रं च हृत्तद्वयोस्त्र मंडलं पुष्पाक्षतैः समभ्यर्च्य तत्र कू
टत्रयेण च षडंगन्यासभागेन समभ्यर्च्य षडस्रकं
चतुरस्रं तथाभ्यर्च्य संस्थाप्यात्र त्रिपादिकां कलास्तु
यैंड्वह्नीनां समभ्यर्च्य यथाविधि कलशेस्मिन्महा
देवि देवीं संपूजयेत्सुरां आनंदभैरवं चैव देवि कूटत्र
येण च मायारमाकामबीजैर्धेनुमुद्रां प्रदर्शयेत् मत्स्य

मुद्रादिनाच्छाद्य सामान्यार्घ्यस्य दक्षिणे कलशार्हं
मंडलं च विधायान्तं महेश्वरि पूर्णतिपात्रं समाधा
य मूलेनाष्टाभिमंत्रितं तत्रैव प्रोक्षणीपात्रं तथाव
टुकपात्रकं गुरुपात्रादिषु पूर्वं तीर्थं शंखादयोप्यदः
पंक्त्याकारेण देवेशि पात्राणि स्थापयेत्ततः पाद्यार्घ्यम
धुपर्कीच मनीयपात्रपूजनं विधाय तत्र श्रीदेव्या
न्यासं षडंगपूर्वकं मणिपूरे च हृत्सरंध्रे मूलाधारादि
के शिवे शिवशक्त्योः सामरस्यं विभाव्य साधकेश्वरः
ततः कामकलारूप त्रिपुरीकृतविग्रहः शिवशक्त्योः
पादुकांच तर्पयामि नमः इति समर्थ्या देवि संतर्प्य त
तः कूटत्रयेणाथ सर्वं तत्ताप्यशुद्धन्यायाः पूजनीया
स्तु तर्पणैः संतर्पयेद्गुरूंस्तत्र दिव्यौघादीन्महेश्वरि
पराशक्तियुताः पूज्या सीर्थावाता महेश्वरि तत्त्वत्रये
णाचाचम्य शिवएव भवेत्स्वयं श्रीचक्रे देवदेव्योश्च रू
पंध्यात्वा त्रिवर्णकं स्थापनं सन्निधानं च संमुखीकर
णं शिवे मुद्राभिः साधकः कृत्वा देवीं सम्पूज्य सुद्धया
देव्यै देवाय मूलेन प्राणान्दत्वा महेश्वरि शिवश
क्त्योः परं रूपं ध्यात्वा पूजां समाचरेत् तदादौ देवदे
व्योश्च पाद्यार्घ्यादीन्निवेदयेत् मधुपर्कं निवेद्यापि
निवेद्याचमनीयकं नानालंकारवस्त्राणि निवेद्य सा

प०
ट०
८
6

पकोनमः नैवेद्याचमनीयादि शिवशक्त्योर्निवेदयेत्
दीपधूपादि संभाव्य परमान्नं निवेद्य च ताम्बूलं च मुखे
दत्वा स्वशक्त्या याश्च तर्पयेत् पुष्पांजलिं च श्रीचक्रे द
त्वा पूजां समाचरेत् आदौ कामेश्वरीं नित्यां पूजयेद्भग
मालिनीं नित्यक्लिन्नां च संपूज्य भैरुंडां च महेश्वरि श्री
वह्निवासिनीं नित्यां महाविद्येश्वरीं ततः शिवदूतीं महे
शानि त्वरितां पूजयेत्ततः श्रीकुलसुंदरीं नित्यां नित्यां
नित्यां ततः परं ततो नीलपताकां च विजयां च महेश्वरि
श्रीसर्वमंगलां नित्यां ज्वालामालां ततः परं चित्रां नित्यां
महेशानि त्रिकूटां पूजयेच्छिवे पुनः पुष्पांजलिं दत्वा
श्रीविद्याष्टभागयोः गुरुपंक्तित्रयी पूज्या तर्पणीया
पृथक् पृथक् गुरुपूजां विधायाथ त्रिपुरां पूजयेत्ततः
त्रिपुरां पूजयाम्यथ तर्पयामि नमः इति तत्रादौ पूज
येद्देवि ऐं क्लीं सौः त्रिपुरेश्वरीं त्रिपुरसुंदरीं देवि त
तस्त्रिपुरवासिनीं त्रिपुरां पूजयेन्मंत्री ऐं क्लीं त्रिपुरमा
लिनीं ह्रीं श्रीं सौः त्रिपुरां सिद्धां पूजयेत्त्रिपुरांबिकां
पूजयेन्मातृकामंत्रैः महात्रिपुरसुंदरीं इति श्रीचक्र
रत्नादि वैन्दवान्तेषु पूजयेत् नवचक्रेषु देवेशि नव
चक्रेश्वरीः पुनः पूजनीयाश्च योगिन्यो वामावर्तेन या
वन्ति अणिमाद्यास्तथा सिद्धीः पूजयेत्साधको नमः ब्रा

ह्म्याद्यामातरः पूज्या रेखास्वपरमेश्वरि सर्वसंक्षोभि
णीमुद्रा नवमुद्राः प्रपूजयेत् ततोमूलेनश्रीविद्यां सं
तर्प्य परमेश्वरी पुष्पांजलिंचश्रीचक्रे दत्वात्वष्टदले
र्चयेत् सर्वाशापूरकायात्र श्रीचक्राय महेश्वरि दद्यात्पु
ष्पांजलिं दिव्यां ततः संपूजयेच्छिवे ह्रीश्रीकामाकर्षिणी
च नित्याकलापरांविते अंश्रीबुद्ध्याकर्षिणीच तथाहंका
रकर्षिणी ईंशब्दाकर्षिणीच तथाउंस्पर्शाकर्षिणी ऊंरू
पाकर्षिणीनित्या ऋंरसाकर्षिणीतथा ॠंगंधाकर्षिणी
नित्या लृंचित्ताकर्षिणीतथा ॡंधैर्याकर्षिणीनित्या एं
स्मृत्याकर्षिणीतथा ऐंनामाकर्षिणीनित्या ओंबीजाक
र्षिणीतथा औंआत्माकर्षिणीनित्या अमृताकर्षिणीत
था अःशरीराकर्षिणीच षोडशारेषु पूजयेत् मूलदे
वीमहादेवि संतर्प्यसाधकोत्तमः सर्वसंक्षोभकेचक्रे
दत्वापुष्पांजलिंततः अनंगकुसुमांदेवी मनंगमेखले
तिच अनंगमदनांदेवी मनंगमदनातुरां संपूज्यानंगरे
खांच संपूज्यानंगवेगिनी अनंगांकुशांसंपूज्या संपूज्या
नंगमालिनी संपूज्याष्टदलेदेवि मूलदेवींचतर्पयेत्
शिवशक्तीसाधकेशः प्रणमेद्योनिमुद्रया ध्येतच्चक्रवि
नयं ध्यायेद्वंद्वस्वरूपकं सर्वसौभाग्यदायात्र श्रीचक्राय
महेश्वरि दत्वापुष्पांजलिंमंत्री पूजयेत्साधकोत्तमः स

प॰ ७

7

र्वसंक्षोभिणीशक्तिः सर्वविद्राविणीतथा श्रीसर्वाकर्षि
णीशक्तिः सर्वाह्लादनकारिणी सर्वसंमोहिनीशक्तिः
सर्वस्तंभनकारिणी श्रीसर्वजृंभिणीशक्तिः सर्ववशंक
रीततः श्रीसर्वरंजनीशक्तिः सर्वोन्मादनरूपिणी सर्वा
र्थसाधनीशक्तिः सर्वसंपत्प्रपूरिणी सर्वमंत्रमयीशक्तिः
सर्वद्वंद्वक्षयंकरी संपूज्यासाधकैरेता वामावर्तेनपार्वे
ति कामेश्वरींचसंनत्य प्रणमेद्यो[illegible]या सर्वार्थसाध
कायाथ चक्रायसाधकोत्तमः पुष्पांजलिंततो दत्वा पू
जयेत्सिद्धिदेवताः सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदात
था सर्वप्रियंकरीदेवी सर्वमंगलकारिणी सर्वांगसुं
दरीदेवी सर्वसौभाग्यदायिनी गंधाद्यैः समभ्यर्च्य त
र्पयेन्मूलदेवतां कामेश्वरींचदेवेशि प्रणमेद्योनिमुद्र
या सर्वरक्षाकरायात्र चक्रायसुरवंदिते दत्वापुष्पां
जलिंदेवि पूजयेत्साधकोत्तमः ह्रीं श्रीं श्रीं सर्वज्ञतादे
वी सर्वशक्तिस्ततःपरं सर्वैश्वर्यप्रदादेवी सर्वज्ञानम
यीततः ततःसंपूजनीयाच सर्वव्याधिविनाशिनी सर्वा
धारस्वरूपाच सर्वपापहराततः सर्वानंदमयीदेवी
सर्वरक्षास्वरूपिणी महादेविमहादेवी सर्वेप्सितफल
प्रदा इतिगंधाद्यैः पूज्या मूलदेवींचतर्पयेत् संतर्प्य
तशिवांदेवीं प्रणमेद्योनिमुद्रया पत्रद्वितीयचक्रांत

सूर्यरूपं स्मरेत्तद्धृदि सर्वरोगहरायात्र चक्रायत
त्स्वरूपिणे दत्वापुष्पांजलिं देवि पूजयेद्देवताष्टकं
वशिनीवाग्देवतादौ कामेश्वरी ततः शिवे मोदिनी
वाग्देवताच विमलाप्यरुणा ततः जयिनीवाग्देवताच
पूज्या सर्वेश्वरी ततः कौलिनीवाग्देवताच पूज्यास्तास्त
र्पयामहे गंधाक्षतप्रसूनाद्यैर्मूलदेवीं च तर्पयेत् स
मास्तिक्रममवाप्त्यर्थं प्रणामे योनिमुद्रया वाग्देवताष्ट
कं पूज्य [illegible] ततः वामक्रमेण संपूज्य ॐत्रै
लोक्यमोहनचक्राय दत्वापुष्पांजलिं ततः दत्वाथो हस्तक
मले देव्याः पश्चिमभागके जृंभिणी कामबाणादौ वामा
धो हस्तभागके मोहनं कामयेत्तुश्च दक्षिणे देवि तत्करे
वशीकारं कामपाशं कामांकुशं च स्तंभनं चतुर्ष्कर प
र्वेषु पूजयेदायुधानि च सर्वसिद्धिप्रदायात्र श्रीचक्रा
य महेश्वरि दत्वापुष्पांजलिं पूजामारभेत्साधकोत्तमः
कामेश्वरीं वज्रेश्वरीं पूजयेद्भगमालिनीं कूटत्रयेण
देवेशि त्रिकोणे साधकोत्तमः इति संपूज्य संतर्प्य
मूलेन मूलदेवतां सर्वानंदमयायात्र श्रीचक्राय
सुविंदवे दद्यात्पुष्पांजलिं देवि साधकः सर्वसिद्धये
मूलविद्यां समुच्चार्य सप्तवारं महेश्वरि पूजयेत्साथ
को भक्त्या महात्रिपुरसुंदरीं इति संपूज्य संतर्प्य गंधा

प॰ प॰ ८

ततप्रसूनकैः धूपदीपादिभिश्चैव नैवेद्यैश्च महत्तरैः
तथाश्रीवटुकायापि दद्याद्बलिमनुत्तमं दत्वा देवेशि पु
नर्देवि नैवेद्याचमनीयकं तांबूलछत्रचामरादि
कादीन्निवेदयेत् संक्षोभद्रावणाकृष्टि वशोन्मादनमहां
कुशाः खेचरीबीजयोन्याख्या नवमुद्राः प्रदर्शयेत् सौ
भाग्यबीजन्यासेन स्वदेहं व्यापयेच्छिवे देव्यग्रे च जपेत्कृ
त्वा पाठं ज्ञयीत्ततः परं वर्मसहस्रनामस्तोत्रं स्तोत्रराज
मपार्वति शिवशक्तो महादेवि जपं तत्र समर्पयेत्
गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपं सिद्धिर्भ
वतु मे देवि त्वत्प्रसादान्महेश्वरि गणेशाय इहतत्त्वं तु
योगिनी राशिरूपिणी ध्यात्वात्मा संवरेद्देवि देवदेव्यौ
विसर्जयेत् प्रातःप्रभृति सायांतं सायादि प्रातरंततः
यत्करोमि जगन्मातः तदस्तु तव पूजनं संहारमुद्रया
देवि देवदेव्यौ विसृज्य च स्वयं सदाशिवो भूत्वा शिव
शक्तिस्वरूपकः त्रैलोक्यं साधको देवि स्वेच्छया विहरे
दिति प्रयोगांश्चैव वक्ष्येहमष्टौ पर्वतनंदिनि उपचा
रं ब्रवीम्यद्य नवाख्येयं डरात्मने स्तंभनं मोहनं चैव
मारणाकर्षणे तथा वशीकारं तथोच्चाटं शांतिकं
पौष्टिकं तथा एतेषां साधनं वक्ष्ये जगतां हितका
म्यया शुभकाय न दातव्यं न दुष्टाय कदाचन खात्तुम्याय शय

त्गत्वाश्वेतगृहान्तिकम् मूलंसाधकएवाष्टजपेद
युतसंख्यया होमोजातीफलैःपीतैःपुष्पैश्चघृत
मिश्रकैः शत्रुसैन्यादिदस्यूनांवादिनांस्तंभनंभवे
त् इतिस्तंभनम् सोमेमध्याह्नसमयेस्नात्वाकूप
जलेनतु कूपांतिकेमंत्रंजप्त्वासाधकोयुतसं
ख्यया होमयेत्घृतमिश्रंचमाहिषंदधिशर्क
रम् भस्मनातिलकंकुर्यात्मोहयेत्भुवन
त्रयम् इतिमोहनम् भौमेर्धरात्रसमयेचतु
ष्पथगतःसुधीः अयुतंतुजपेन्मूलंहोमयेत्
घृतपायसम् रक्तचंदनमिश्रंवस्त्रीकेशैश्च
समन्वितम् शत्रुःकालसमानोपिमृत्युमेष्यति
नान्यथा इतिमारणम् बुधेनिशावसानेतुग
त्वाशून्यालयंजपेत् अयुतंमूलमंत्रंतुहोम
येत्घृतशर्करम् कर्णिकारसहस्राणिबि
ल्वपुष्पाणिपार्वति रंभायस्तरसांवापिभवे
दाकर्षणंध्रुवम् इत्याकर्षणम् गुरौसूर्योद
येगत्वानदीतीरेचसाधकः मूलमंत्रमहा
देव्याजपेदयुतसंख्यया होमःसर्पिर्दधिक्षी
रम्मल्लिकामालतीपुष्पैः श्रीफलैस्सहसादेवि
वशयेद्भुवनत्रयम् इतिवशीकरणम् शुक्रे

प॰ ट॰ ९

१

निशायां स्वेगत्वा वटमूले जपेन्मनुम् श्रुतेसाध
कोभक्त्या होमः कार्यस्तु सर्पिषा दध्याज्याक्ताविमि
श्रेणगोमांसेनचपायसैः ष्ठाद्रो मित्रसहस्रस्यापि
भवत्युच्चाटनं ध्रुवम् इत्युच्चाटनम् शनौ प्रभा
तसमये कृत्वा कर्म्माह्निकं सुधीः आगत्यार्चन
शाय्यां तु जपेन्मंत्रं आयुतं शिवे होमयेत्सर्पिरं भो
ज सहस्राणि चतुर्दश ग्रहाणां देवकोपानां य
त्राणां रक्षसां तथा उपद्रवाणां सर्वेषां भयानां
नृपतेस्तथा क्रूराणामनिष्टानां महाशान्तिः
प्रजायते इति शांतिकम् सर्ववारेषु सर्वत्र जपे
न्मंत्रं समाहितम् होमयेत्सर्पिरक्तोटमिश्रं चंद
नमिश्रितम् पायसं तंकमिश्रं च मीनमांससम
न्वितम् देवतानां मनुष्याणां रोगार्तीनां महे
श्वरि ब्रह्मादीनां नृपादीनां महापुष्टिः प्रजायते
इति पौष्टिकम् इतीदं पटलं गोप्यं गुप्यमांगसु
रेश्वरि मारं त्रिपुरसुंदर्य्या रत्नालीयं स्वपुत्रवत्
गुह्यं गुह्यतमं गोप्यं गोपनीयं स्वयोनिवत् इ
ति श्रीरुद्रयामले तंत्रे देवीभैरवसंवादे महा
त्रिपुरसुंदरीपटलः ॥ समाप्तः शुभम्

श्री
१

प्रातःकृत्यमकृत्वा तु
यो देवीं च समर्चयेत्
तस्य सर्वा तु विफला
पूजा च हीनायथा क्रिया

ॐ श्रीगणेशाय नमः श्रीदेव्युवाच भगवन्सर्वधर्मज्ञ सकलागम
पारग त्रिपुरायामहादेव्याः पद्धतिं वद मे प्रभो श्रीभैरव उवाच अधुना
देवि वक्ष्यामि त्रिपुरार्चनपद्धतिं गद्यपद्यमयीं गोप्यां सक
लागमनिश्चितां तत्र श्रीमान्साधकेन्द्रः ब्राह्मे दिव्यमुहू
र्तके प्रातरुत्थाय शयनात्कुलवृक्षं प्रणम्य च श्लेष्मांत
ककरंजाख्यं निंबाम्रत्यकदंबकं विल्वं वटोडुंबरं चैता
लोऽङ्कोटकखर्ज्जूरं जलहस्तं समुद्दिष्टं प्रणमेत्साय।
हस्तो कोभुवि प्रक्षाल्य चरणौ करौ मुखं समुपविश्य च
निजासने त्रिराचम्य साधकेन्द्रो गुरुं ध्यायेत्परं शिवे
स्वशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णि
कांतर्गतचंद्रमंडलोपरि स्वगुरुं निषण्णं विभाव्य श्री
गुरुं शुक्लवर्णं च शुक्लालंकारभूषितं ज्ञानानंदमुदि
तमानसं सच्चिदानंदविग्रहं त्रिनयनं चतुर्भुजं ज्ञा
नमुद्रापुस्तकवराभयकरं प्रसन्नवदनेक्षणं सर्व
देवस्वरूपिणं वामांगे वामहस्तधृतकमलां रक्ता या
भरणभूषितया स्वप्रियया दत्तभुजेनालिंगितं परम सर्वदेवदेवं सर्वतीर्थतीर्थं
शांतं सुप्रसन्नं शिवस्वरूपं ध्यात्वा तच्चरणकमलविगलदमृतधा
रया स्वात्मानं प्लुतं विभाव्य मूलादिब्रह्मरंध्रांतं मूलं युगल
ध्यात्वा गुरुं स्मरेत् प्रह्लादानंदनाथं च सकलानंदना
थकं कुमारानंदनाथं च वसिष्ठानंदनाथकं क्रोधा
नंदं सुखानंदं ध्यानानंदं तथापरं बोधानंदं सुकानं

मानसोपचारैर्ग
लं पृथिव्यात्मकं
आकाशात्मकं
वाय्वात्मकं धू
तेजसात्मकं दी
अमृतात्मकं
सर्वात्मकं
दिकं श्री
कार्ये समर्पया
श्रीगुरुम

दं ध्यायेत्कुलमुखोपरि ब्रह्मरंध्रस्थिते पद्मे सहस्रदल
शोभिते महारसरसोल्लासमु[illegible]राघूर्णितलोचनान्
कुलालिंगनसंभिन्नान् घूर्णिताशेषतामसान् कुल
शिष्यैः परिवृतान् पूर्णान्तःकरणोद्यतान् वराभययु
तान् सर्वान् कुलतंत्रार्थवेदिनः एवंकुलगुरून् ध्याये
द्गुरूञ्ऋष्यादिकं शिवे ॐ अस्य श्रीगुरुमंत्रस्य सनत्कुमा
रऋषिः पंक्तिश्छंदः श्रीप्रकाशानंददेवता ऐंबीजं क्लीं श
क्तिः श्रीं कीलकं मम श्रीधर्मार्थकाममोक्षार्थे जपे विनि
योगः इति कृतांजलिः स्मृत्वा न्यसेद्यथा सनत्कुमारऋ
षये नमः शिरसि पंक्तिश्छंदसे नमः मुखे श्रीप्रकाशा
नंदनाथदेवतायै नमः हृदि ऐंबीजाय नमः नाभौ क्लीं
शक्तये नमः गुह्ये श्रींकीलकाय नमः पादयोः मम
श्रीधर्मार्थकाममोक्षार्थे जपे विनियोगः सर्वांगेषु इति
ऋष्यादिन्यासः अथ करन्यासः ॐ ऐं क्लीं श्रीं अंगुष्ठाभ्यां
नमः हस्रवृफ्रें तर्जनीभ्यां नमः हसरक्षमलवयऊं
मध्यमाभ्यां वषट् सहखफ्रें अनामिकाभ्यां ऊं सहक्ष
मलवरयऊं कनिष्ठिकाभ्यां वौषट् ह्सौः स्हौः अमुकान
दनाथश्री[illegible]बा श्रीपादुकां पूजयामि नमः करतल
करपृष्ठाभ्यां फट् इति करन्यासः अथ षडंगन्यासः ॐ
ऐं ह्रीं श्रीं हृदयाय नमः हसखफ्रें शिरसे स्वाहा हसर

सर्वसुकानंददेवता
सर्वसुकानंद
गुह्ये
नाभौ
पादयो:
स्वाहा
अमुकां

श्री॰ ह्मलवयऊं शिखायै वषट् ह्सखफ्रें कवचाय हुं सह
२ ह्मलवरयऊं नेत्रत्रयाय वौषट् स्हौः स्हौः श्री का
अमुकां नंदनाथदेवांबाश्रीपादुकां पूजयामि नमः अस्त्राय फ
२ ट् इति षडंगन्यासः अथ ध्यानं सहस्रदलपंकजे स
कलशीतरश्मिप्रभं वराभयकरांबुजं विमलगंधपु
ष्पांबरं प्रसन्नवदनेक्षणं सकलदेवतारूपिणं स्म
रेच्छिरसि हंसगं तदभिधानपूर्वं गुरुं इति गुरुं ध्यात्वा मा
नसोपचारैः गुरुं संपूजयेद्यथा लं पृथिव्यात्मकं श्री
गुरुमूर्तये समर्पयामि नमः हं आकाशात्मकं पुष्पं
श्रीगुरुमूर्तये समर्पयामि नमः यं वाय्वात्मकं धूपं
श्रीगुरुमूर्तये समर्पयामि नमः रं वह्न्यात्मकं दीपं
श्रीगुरुमूर्तये समर्पयामि नमः वं अमृतात्मकं ना
नानैवेद्यं श्रीगुरुमूर्तये समर्पयामि नमः सं सर्वा
त्मकफलमूलतांबूलं श्रीगुरुमूर्तये समर्पयामि न
मः इति मानसोपचारैर्गुरुं संपूज्य यथाशक्ति गुरुमं
पठेन्मंत्र त्रं जपेद्देवि समर्पयेत् ततः प्रणम्य साधकेशं पठेन्मं
त्रान् परं शिवे नमामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपि
णं शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये श्री
गुरुं परमानंदं वंदाम्यानंदविग्रहं यस्य सान्निध्यमा
त्रेण चिदानंदायते परं नमोऽस्तु गुरवे तस्मा इष्टदे

इति दशधा मनसाइद अर्थात्

वस्वरूपिणे यस्य वागमृतं हन्ति विषं संसारसंज्ञकं अ
ज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलि
तं येन तस्मै श्रीगुरवे नमः गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः
साक्षान्महेश्वरः गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः
अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं ये
न तस्मै श्रीगुरवे नमः नमस्ते नाथ भगवन् शिवाय
गुरुरूपिणे विद्यावतारसंसिद्धै स्वीकृतानेकविग्र
ह नवाय नवरूपाय परमार्थैकरूपिणे सर्वाज्ञान
तमोभेदभानवे चिद्घनाय ते स्वतंत्राय दयाक्लृप्तवि
ग्रहाय परात्मने परतंत्राय भक्तानां भव्यानां भव्यरू
पिणे ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनां वि
वेकिनां विवेकाय विमर्शाय विमर्शिनां पुरस्तात्पार्श्व
योः पृष्ठे नमस्कुर्यामुपर्यधः सदा मच्चित्तरूपेण वि
धेहि भवदासनं त्वत्प्रसादादहं देव कृतकृत्योस्मि स
र्वतः मायामृत्युमहापाशाद्विमुक्तोस्मि शिवोस्मि च
इति गुरुं प्रणम्य सुप्रसन्नं च विभाव्य मनसाज्ञांगृही तदा
पीठो
त्वा च मूलाधारे त्रिकोणचक्रोपरि परांशक्तिं कुंड
लिनीं समुद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिस
न्निभां सकलमंत्रमातरं पंचाशद्वर्णविग्रहां महा
त्रिशत्कलारूपिणीं सर्वप्राणिजीवां क्रियामयामा

स्वर्णवर्णचतुर्दलकमलकर्णिकांतर्गतशृंगाटकांतर्गत [illegible]

सर्वकामसूर्यमध्ये सार्धत्रिवलयां

श्री॰ ३ तं सर्पाकारामर्धचतुर्वी सार्धत्रिवलयां विसतन्तुतनी

सर्वदेवाधिदेवी सकलमेव मातरं ५

यसीं सुप्तां विभाव्य तत्रपूजयेत् वंनमः शंनमः षंन

मः संनमः इतिपत्रेषु मध्ये मूलेनचप्रादक्षिण्येन

3 संपूज्य हंस इतिमन्त्रेण सर्वतोत्थाप्य ततः स्वाधिष्ठा

नेलिंगमूले विद्रुमवर्णे षट्दलकमलेतांनीत्वा

तत्रपूजयेत् बंनमः भंनमः मंनमः यंनमः रंन

मः लंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततो

के मणिपूरनाभौ नीलवर्णे दशदलकमलेतांनीत्वा

तत्रपूजयेत् डंनमः ढंनमः णंनमः तंनमः थंन

मः दंनमः धंनमः नंनमः पंनमः फंनमः इतिपत्रे

षु मध्ये मूलेनचसंपूज्य ततोवक्षस्यनाहते पिंगल

वर्णे द्वादशदलकमलेतांनीत्वा तत्रपूजयेत् कं

नमः खंनमः गंनमः घंनमः ङंनमः चंनमः छं

नमः जंनमः झंनमः ञंनमः टंनमः ठंनमः इ

तिपत्रेषुमध्येमूलेनचसंपूज्य ततोविशुद्धौकंठे

धूम्रवर्णे षोडशदलकमलेतांनीत्वा तत्रपूजये

त् अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः

ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः

ओंनमः औंनमः अंनमः अःनमः इतिपत्रेषुमध्ये

मूलेनचसंपूज्य ततःभ्रूमध्येआज्ञाचक्रे विद्युद

श्रीगुरुपादि
निजसहजन
सर्वैतत्कवि
मूलाधा
तदलक
सर्णवर्णे

र्णे द्विदलकमले तां नीत्वा तत्र पूजयेत् हं नमः
क्षं नमः इति पत्रेषु मध्ये मूलेन च संपूज्य तत्र स
हस्रदलकमलकर्णिकान्तर्गत बिन्दुरूपतेजो
मयपरमशिवेन सहैकतां नीत्वा तेनामृतेन त
तः स्रवता तां कुण्डलिनीं संतर्प्य तत्र नादश्रवणान
न्तरो मुहूर्तं लयं विभाव्य पुनरपि सोहमिति मं
त्रेण तां कुण्डलिनीमाज्ञाचक्रे विशुद्धवर्णे द्विदलक
मले तां समानीय तत्र पूजयेत् हं नमः क्षं नमः
इति पत्रेषु मध्ये मूलेन च संपूज्य ततो विशुद्धौ कं
ठे धूम्रवर्णे षोडशदलकमले तां समानीय तत्र
पूजयेत् अं नमः आं नमः इं नमः ईं नमः उं नमः
ऊं नमः ऋं नमः ॠं नमः लृं नमः ॡं नमः एं नमः
ऐं नमः ओं नमः औं नमः अं नमः अः नमः इति प
त्रेषु मध्ये मूलेन च संपूज्य ततो वक्षस्यनाहते पिं
गलवर्णे द्वादशकमले तां समानीय तत्र पूजये
त् कं नमः खं नमः गं नमः घं नमः ङं नमः चं न
मः छं नमः जं नमः झं नमः ञं नमः टं नमः ठं
नमः इति पत्रेषु मध्ये मूलेन च संपूज्य ततो मणि
पूरे नाभौ नीलवर्णे दशदलकमले तां समानीय
तत्र पूजयेत् डं नमः ढं नमः णं नमः तं नमः थं

प्रवरोहक्रमेण

श्री॰
४

नमः दंनमः धंनमः नंनमः पंनमः फंनमः इतिप
त्रेषुमध्येमूलेनचसंपूज्य ततःस्वाधिष्ठानेलिंगमू
लेविद्रुमवर्णेषट्दलकमलेतांसमानीयतत्रपू
जयेत् बंनमः भंनमः मंनमः यंनमः रंनमः लंन
मः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोमूलाधारे
स्वर्णवर्णे चतुर्दलकमलेतांसमानीय तत्रपूजये
त् वंनमः शंनमः षंनमः संनमः इतिपत्रेषुमध्ये
मूलेनचसंपूज्य इत्यारोहावरोहेण कुंडलिनीं स्व
स्थानेस्थापयेत्परं प्राणायामत्रयंकुर्याद्यथा तत्रप्र
णवंमूलंवा षोडशवारमुच्चरन् दक्षकरांगुष्ठेन द
क्षनासापुटंनिरुध्य वामेनपवनंपूरयेत् ततस्त
मेवचतुःषष्टिवारमुच्चरन् दक्षानामाकनिष्ठिका
भ्यांवामपुटंचतथैव निरुध्य द्वाभ्यांपवनंकुंभये
त् ततस्तमेवद्वात्रिंशद्वारमुच्चरन् वामपुटंचत
थैवनिरुध्य दक्षेणपवनंरेचयेत् प्राणायामत्रयं
कृत्वा ऋष्यादिकारयेद्यथा ॐअस्यश्रीत्रिपुरामे
त्रस्य श्रीदक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्रीत्रिपुरा
देवता (प्रथमं) बीजं (तृतीयं) शक्तिः (द्वितीयं) कीलकं ममश्रीधर्मा
र्थकाममोक्षार्थेजपेविनियोगः इतिकृतांजलिःस्म
त्वान्यसेद्यथा श्रीदक्षिणामूर्ति ऋषयेनमः शिरसि

मूलाधारेस्थापयेत्
मूलाधारेवह्निमंडलं
दशकलात्मकंविभाव्य
तन्मध्येमूलविद्यायाः
प्रथमकूटं अनाहत
पर्यन्तप्राप्तनादशिखं
ध्यात्वा अनाहतेसूर्य
मंडलंद्वादशकलात्म
कं विभाव्य तन्मध्येमू
लविद्याया द्वितीयकूटं
आज्ञाचक्रपर्यन्तप्राप्त
शिखंध्यात्वा आज्ञाचक्रे
सोममंडलंषोडशक
लात्मकं विचिंत्य तन्म
ध्येमूलविद्यायास्तृ
तीयकूटंब्रह्मरंध्रप
र्यंतप्राप्तशिखंध्यात्वा
मूलादिब्रह्मरंध्रान्तं
मूलविद्यांशुद्धदिनकर
सहस्रभास्वरांतेजोम
यीमखंडांध्यात्वा तत्ते
जसाध्यात्मस्वदेहंसं
चिंत्य तत्तेजसैवधारि
तांतांपरदेवतांस्वहृ
दयकमलेस्वाभेदेन
ध्यात्वा मानसोपचा
रैराराध्ययथाशक्ति
जप्त्वा समर्पयेत्

पंक्तिछंदसेनमः मुखे श्रीत्रिपुरादेवतायैनमः हृ
तृतीयकूटं
प्रथमकूटं दि [illegible] बीजायैनमः गुह्ये [illegible] शक्तयेनमः शि [illegible] पादयोः
[illegible] द्वितीयं कीलकायनमः [illegible] ममश्रीधर्मार्थकाममो
क्षार्थे जपेविनियोगः सर्वांगेषु इतिऋष्यादिन्यासः
अथकरन्यासः श्रींह्रींक्लींऐंसौः अंगुष्ठाभ्यांनमः प्रथमं
द्वितीयं ॐह्रींश्रीं तर्जनीभ्यांनमः सकल ह्रीं मध्यमाभ्यां
वषट् कएईलह्रीं अनामिकाभ्यांहुं हसकलह्रीं
कनिष्ठिकाभ्यांवौषट् [illegible] श्रीकरतलक सकलह्रीं
रपृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः २
प्रथमं [illegible] सौः हृदयायनमः ॐह्रींश्रीं शिरसे
स्वाहा कएई [illegible] शिखायैवषट् हसकलह्रीं
१ कवचायहुं [illegible] नेत्रत्रयायवौषट् [illegible]
[illegible] अस्त्रायफट् इतिषडंगन्यासः अथध्यानम्
चंद्रार्कानलकोटिनीरदरुचिंपाशांकुशाभासुगा
न् मुंडंखड्गमभीतिमीश्वरवरं हस्तांबुजैरष्टभिः
कामेशानशवोपरिस्थितिनपदंरुद्रंतीवहंतीपरां
श्रीचिंतामणिमंत्रवीजवपुषींध्यायेन्महाषोड
शीं इतिस्वरूपादिदेवीध्यात्वा मनसोपचारैर्देवींस
पूजयेद्यथा ॐलंपृथिव्यात्मकंगंधंश्रीत्रिपुरायै
समर्पयामिनमः ॐहंआकाशात्मकंपुष्पंश्रीत्रि

आरक्ताभांत्रिनेत्रांमणि
मुकुटवतींरत्नताटंक
रम्यां हस्ताम्भोजैस्स
पाशांकुशमदनधनुः
सायकैर्विस्फुरंती
आपीनोत्तुंगवक्षोरुह
लटविलसत्तारहारोज्ज्व
लांगी ध्यायेत्पद्मासन
हस्यामकल निवसना
मीश्वरीमीश्वराणाम् १

श्री· ५

पुरायै समर्पयामि नमः ॐ यं वाय्वात्मकं धूपं श्रीत्रिपुरा
यै समर्पयामि नमः ॐ रं वह्न्यात्मकं दीपं श्रीत्रिपुरा
यै समर्पयामि नमः ॐ वं अमृतात्मकं नानानैवेद्यं
श्रीत्रिपुरायै समर्पयामि नमः ॐ सं सर्वात्मकं फलमू
लतांबूलं श्रीत्रिपुरायै समर्पयामि नमः इति मनसो
पचारैर्देवीं संपूज्य मंत्रसंस्कारं कुर्याद्यथा कं हंसः
श्रीं ह्रीं क्लीं ऐं सौंः ॐ ह्रीं श्रीं क ए ई ह्रीं स क ह ल ह्रीं क ल
ह्रीं सौंः ऐं क्लीं ह्रीं श्रीं इत्युत्कीलनमंत्रं त्रिर्जप्त्वा सौंः
ऐं क्लीं ह्रीं श्रीं श्रीं ह्रीं क्लीं ऐं सौंः ॐ ह्रीं श्रीं क ए ई ल ह्रीं
ॐ ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं इति संजीवनमंत्रं त्रिर्ज
प्त्वा ऐं क्लीं सौंः क ए ई ल ह्रीं ॐ ह्रीं श्रीं सदाशिवस्य
शापं मोचय मोचय सकल ह्रीं इति शापहारि
मंत्रं दशधा जप्त्वा ॐ ऐं नमस्त्रिपुरास्त्राय दह दह
दुरितं क्लीं हन हन कीलान् सौंः त्रिपुरी स्वाहा इ
त्य ति स मंत्रं त्रिर्जप्त्वा ॐ मूलं ॐ इति सनकद्वयनिवा
रणार्थं सप्तधा मंत्रं जप्त्वा इति मंत्रसंस्कारं कृत्वा
मालां वामकरेण गृहीत्वा मंत्रयेद्यथा माले मा
ले महामाले सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्व
यि न्यस्तस्तस्मान्मे सिद्धिदा भव स्वाहा इति मंत्रे
ण मालां वामकरेण गृहीत्वा दक्षकरेण मालां

संपूज्ययेद्यथा ॐ ह्रीं सिद्धे गंधाक्षतपुष्पाय नमः इतिमं
त्रेण गंधाक्षतपुष्पैः मालां संपूज्य ॐ गं अविघ्नं कुरु मे स्वा
हा इति मंत्रेण मालां दक्षकरे गृहीत्वा यथाशक्ति
साधकेशः जपं कृत्वा शनैः परं इति मंत्रेण मालां स्व
शिरसि संस्थाप्य पुनरपि प्राणायामऋष्यादिकर
षडंगन्यासादिकं विधाय सकलह्रीं श्रीं ह्रीं क्लीं ऐंः सौंः
ॐ ह्रीं श्रीं कएईलह्रीं हसकलह्रीं सौंः ऐं क्लीं ह्रीं श्रीं इति
संपुटमंत्रं विसर्जयेत् गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्म
त्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इ
ति मंत्रेण तेजोरूपं जपफलं देव्या वामहस्ते समर्प्य
मालां स्वस्थाने संस्थाप्य निजकृत्यं समर्पयेद्यथा प्र
काशमानां प्रथमे प्रयाणे प्रतिप्रयाणेप्यमृतायमा
नां अंतःपदव्यामनुसंचरंती मानंदरूपामबलां प्रप
द्ये अहं देवी न चान्योस्मि ब्रह्मैवाहं न शोकभाक् सच्चि
दानंदरूपोहं स्वात्मानं चविचिंतयेत् प्रातः प्रभृति
सायांतं सायादिप्रातरंततः यत्करोमि जगन्मातस्तद
स्तु तव पूजनं त्रैलोक्यचैतन्यमयेसुरेशि श्रीमोड
शिवत्वचरणाज्ञयैव प्रातः समुत्थाय तव प्रियार्थं सं
सारयात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमाने त्व
दाज्ञया श्री त्रिपुरे सुरेशि स्पर्धातिरस्कारकलिप्रमाद

श्री॰
८

मयानिमांमाभिभवंतमातः जानामिधर्मंनचमेप्रवृत्ति
र्जानाम्यधर्मंनचमेनिवृत्तिः त्वयाहृषीकेशहृदिस्थयाहं
यथानियुक्तोस्मितथाकरोमि अनेनप्रार्थयेद्देवीमजपा
जपमाचरेत् अहोरात्रात्मकंकर्म देवताभ्यःशुभाशुभम्
तत्सर्वंदेवदेवेशस्य जपाजपंसमर्पयेत् ॐअद्यपूर्वेद्युरहो
रात्राचरित मुच्छ्वासनिःश्वासात्मकंषट्शताधिकमेक
विंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठा
नमणिपूरकानाहतविशुद्धाज्ञाब्रह्मरंध्रेषु चतुर्दल
षट्दलद्वादशदलषोडशदलद्विदलसहस्रदलेषु
स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्पूरवर्णेषुस्थि
तेभ्योगणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगु
रुपादुकाभ्यो यथाभागशःसमर्पयामिनमः हकारे
रेणबहिर्यातिसकारेणविशेत्पुनः हंसहंसेतिमंत्रे
णजीवोजपतिसर्वदा वशषसदलयुक्ते सम्यगाधा
रपद्मे तरुणमरुणगात्रंवारणास्यंगणेशं अभयवर
दहस्तंचारुपाशांकुशौवा करयुगलमनेनेचिंतये
दादिमूर्तिं तत्पुरुषायविद्महे वक्रतुंडायधीमहि त
न्नोदंतिःप्रचोदयात् मूलधारचक्रस्थाय गणपतये
अजपाजपानांषट्शतंसमर्पयामिनमः इतिमूलाधा
रचक्रेगणपतिंसमर्पयेत् १ वभमयरलसंज्ञैरक्तैः

पत्रब्रह्मैः स्मितमुखिनिविष्टं पंकजे पत्रयोनिं
अभयवरदहस्तं कुंडिकामक्षमालां विष्णुममल
रूपं चिंतयेद्विश्वयोनिं वेदात्मने विद्महे हिरण्य
गर्भाय धीमहि तन्नो ब्रह्म प्रचोदयात् स्वाधिष्ठान
चक्रस्थाय ब्रह्मणे अजपाजपानां षट् सहस्राणि
६००० समर्पयामि नमः इति स्वाधिष्ठान चक्रे ब्रह्म
णे समर्पयेत् २ डाद्यैः फांतगतैः प्रकल्पित दलैः
पद्मे निविष्टो हरिः मार्तंडद्युतिमादिरूपममजं ना
रायणं चिंतयेत् चक्राम्भोजगदादिशंखममलं पी
तांबरं कौस्तुभं श्रीवत्सांकितनूपुरं तनुलसत्पी
तांबरं चिंतयेत् नारायणाय विद्महे वासुदेवाय
धीमहि तन्नो विष्णुः प्रचोदयात् मणिपूरकचक्र
स्थाय विष्णवे अजपाजपानां षट् सहस्राणि समर्प
यामि नमः इति मणिपूरकचक्रे विष्णवे समर्पयेत्
३ काद्यैः ठांतगतैः प्रकल्पित दलैः पंकेरुहे पार्व
ति कांतं कांतशशांककोटिकिरणं प्रद्योतकवत्सोज्व
लं हांतं टंकमृगोचराभयकरैः युक्तं करे कंकणं ग्रै
वेयांगदहारनूपुरयुतं चर्मांवरं चिंतयेत् तत्पुरुषा
य विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदया
त् अनाहतचक्रस्थाय रुद्राय अजपाजपानां षट्

सहस्राणि समर्पयामि नमः इत्यनाहतचक्रे रुद्रं समर्प
येत् ४ मर्त्यांगेषु निविष्टमिष्टनिहितं शान्तं स्वधामास्पदं
वाचाशेषचराचरं शरणगणं तं विश्वयोनिं मयं मूर्तिमू
र्तमनेकमेवममलं ज्योतिःप्रदीपोपमं साह्नात्वोडशा
पत्रके त्वममले जीवं परं चिंतयेत् हंसहंसाय विद्महे
परमहंसाय धीमहि तन्नो हंसः प्रचोदयात् विशुद्ध
चक्रस्थाय जीवात्मने अजपाजपानामेकसहस्रं स
मर्पयामि नमः इति विशुद्धचक्रे जीवात्मानं समर्पये
त् ५ हंसं भ्रूपरिक्रमपत्रममले दिव्ये जगत्कारणं
विस्तीर्णं द्विकपत्रदेवनिलयं स्वच्छंदमात्रेच्छया
तस्मायोग्यनयास्वदेशात् तु भावैकदीपांकुरं प्र
त्यक्षान्तरविग्रहं गुरुपदं ध्यायेद्धि शुभ्राशान्तं हंसहं
सायविद्महे परमहंसाय धीमहि हंसः [illegible] प्रचो
दयात् आज्ञाचक्रस्थाय परमात्मने अजपाजपाना
मेकसहस्रं समर्पयामि नमः इत्याज्ञाचक्रे परमात्मा
नं समर्पयेत् ६ विश्वव्यापिनमादिदेवममलं नित्यो
दितं निष्कलं नित्योद्भूतसहस्रपत्रकमले लिप्याक्ष
रैर्मंडितैः नित्यानित्यमनन्यदर्शिपरिचितसत्यस्फु
रत्यात्मकं विश्वात्मानमरूपविश्वजक्रहरे स्वच्छंदतः स
र्वतः निरंजनाय विद्महे निराभासाय धीमहि तन्नु

वितनुसूक्ष्मः प्रबोदयात् सहस्रदलकमलकर्णिका
मध्यस्थायै श्रीगुरुपादुकायै अजपाजपानामेकसह
स्रंसमर्पयामि नमः इति सहस्रदलकमले श्रीगुरुं
समर्पयेत् इत्यजपाजपं समर्प्याजपाऋष्यादिकुर्या
यथा ॐ अस्य श्रीअजपामंत्रस्य हंसऋषिः अव्यक्त
गायत्रीछंदः परम[illegible]मादेवता हंबीजं सःशक्तिः सो
हंकीलकं मम श्रीधर्मार्थकाममोक्षार्थे जपे विनियो
गः इति कृतांजलिः स्वत्वान्यसेद्यथा हंसात्मने ऋषये न
मः शिरसि अव्यक्तगायत्रीछंदसे नमः मुखे परमहंस
देवतायै नमः हृदि हंबीजाय नमः गुह्ये सःशक्तये
नमः गुह्ये सोहंकीलकाय नमः नाभौ मम श्रीधर्मा
र्थकाममोक्षार्थे जपे विनियोगः सर्वांगेषु इति ऋष्या
दिन्यासः अथ करन्यासः ह्रां सूर्यात्मने स्वाहा अंगुष्ठाभ्यां
नमः ह्रीं सोमात्मने स्वाहा तर्जनीभ्यां स्वाहा ह्रूं निरंज
नात्मने स्वाहा मध्यमाभ्यां वषट् ह्रैं निराभासात्मने स्वा
हा अनामिकाभ्यां हुं ह्रौं अनंततनुःसूक्ष्मा देवी प्रबो
दयात् स्वाहा कनिष्ठाभ्यां वौषट् ह्रः अव्यक्तबोधात्मने
स्वाहा करतलकरपृष्ठाभ्यां फट् इति करन्यासः अथ
षडंगन्यासः ह्रां सूर्यात्मने स्वाहा हृदयाय नमः ह्रीं सो
मात्मने स्वाहा शिरसे स्वाहा ह्रूं निरंजनात्मने स्वाहा शि

ॐकारस्तत्वं उदात्तस्वरः नमस्थाने हेमवर्णः

नाभौ ॐकारतत्वाय नमः मूर्ध्नि उदात्ताय स्वा[illegible] यनमके

श्री· प
8

स्वायैवषट् ह्रैं निराभासात्मने स्वाहा कवचाय हुं ह्रौं अनंत
तत्त्वः सूक्ष्मा देवी प्रबोधयात् स्वाहा नेत्रत्रयाय वौषट् ह्रः अ
खण्डबोधात्मने स्वाहा अस्त्राय फट् इति षडंगन्यासः अथ ध्या
नं यं मूर्द्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे
दिशः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्योसौ सर्वभूतांत
रात्मा इति विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनु संध्यायां प्रा
णवायोर्निर्गमप्रवेशात्मकमजपामंत्रं पंचविंशतिवा
रं जप्त्वा गुह्येति मंत्रेण समर्प्य गुरूपदिष्टमार्गेण नादानु
संधानपूर्वकं निस्तरंगमनोप्रवर्तमानोस्मीति विभाव्य
स्वकार्यस्यानुज्ञानेन भूमिं संप्रार्थयेच्छिवे समुद्रमेखले
देवि पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं
क्षमस्व मे धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा तेन
सत्येन मां पाहि पाशान्मोचय धारिणि अनेन भूमिं सं
प्रार्थ्य ततोस्याः स्वयं शिवे श्वासानुसारेण भूमौ पादं द
त्वा बहिर्व्रजेत् प्रातःकृत्यमकृत्वा तु यो देवीभक्तितोर्च
येत् निष्फला तस्य पूजा स्याच्छौचहीना यथा क्रिया इ
ति प्रातःकृत्यविधिः अथ शौचविधिः ततो मृदं गृहीत्वा
च शौचं गच्छति साधकः गत्वा नैर्ऋत्यकोणे तु प्रकांते ज
नवर्जिते तृणास्तरितभूदेशे कुर्यान्मलविसर्जनं तत्र
गत्वा साधकेशो भूतानुत्सारयेत्ततः गच्छंतु ऋषयो देवाः

त्मप्रपंचः केनचि
कुलासेन

पिशाचायक्षराक्षसाः पितृभूतगणास्सर्वे करिष्येम
लमोचनं अनेनैवपठित्वाच दत्वातालत्रयंशिखे न
नराभिमुखोपविश्य वस्त्रमाछादयेच्छिरः कर्णस्थ
ब्रह्मसूत्रःसन् कुर्यान्मलविमोचनं कृत्वामूत्रपुरी
षेत्व ततोन्यत्रोपसंविश्य मृदंत्रिधाविभागस्या
भागमेकंप्रगृह्यचस्थूलामलकमानेन गृहीत्वामृद
मादरात् शौचंकार्यंप्रयत्नेन गंधलेपक्षयावधि प
कैलिंगेगुदेद्वित्रः दशाभिर्वामपाणीनां उभयोःकर
योःपंच पादयोस्त्रिस्त्रिरुच्यते इतिशौचविधिः अथदं
तधावनविधिः क्लींबीजेनगंडूषान् द्वा[illegible]ःकुर्यात्ततःप
रं अनिषिद्धदिनेकाष्ठंदंतान्संशोधयेच्छिवे षष्ठ्यमाप्र
तिपद्देविदंतधावनविवर्जितं हृतचेपक[illegible]जेद्रूकस्य
पामार्गादिवाप्रिये अष्टादशेद्वादशंवा ग्रंथलंप्रार्थ्यतं
हरेत् आयुर्बलंयशोवर्चःप्रजापशुधनानिच ब्रह्मप्रज्ञां
चमेधांचत्वन्नोदेहिवनस्पते अनेनवनस्पतिंप्रार्थ्यगृ
हीत्वादंतधावनं ॐ ऐं क्लीं तडित् स्वाहेतिमंत्रेणाछेदये
च्छिवे ॐ क्लींकामदेवाय सर्वजनप्रियायनमः इतिमंत्रे
णदंतान्संशोध्य वाग्भवंजिह्वामुल्लिख्यदंतकाष्ठंत्र
क्षालयेत् नैऋत्यांशुद्धदेशेतु दंतकाष्ठंचनिक्षिपेत्
मुखंमूलेनप्रक्षाल्यत्रिराचम्यपरंशिवे मूलेनात्मतत्वा

श्री॰ ५ १

यस्वाहा मूलेन विद्यातत्त्वाय स्वाहा मूलेन शिवतत्त्वाय स्वाहा
इति त्रिराचम्य देवस्थानान्निर्माल्यमपसार्य नदीस्नानं व्रजे
त्ततः इति दंतधावनविधिः अथ प्रातःस्नानविधिः कुश
मृत्कोलमानीय नदीस्नानं व्रजेत्ततः नदीतीरं समासाद्या
न्येणतीरं प्रक्षाल्य च तत्रासनं साधकेशः संस्थाप्य च य
थाविधि पादौ हस्तौ च प्रक्षाल्य त्रिराचम्य ततः शिवे मूले
नात्मतत्त्वाय स्वाहा मूलेन विद्यातत्त्वाय स्वाहा मूलेन शि
वतत्त्वाय स्वाहा मूलेन विद्यातत्त्वाय स्वाहा मूलेन वशित
त्त्वाय स्वाहा इति त्रिराचम्य पश्चान्मृत्कां च शोधयेद्यथा अस्त्रे
णाभिषु संमंत्रते नैव प्रोक्षयेद्धि वै शिवामंत्रेण संशोध्य
मूलेनाभिचमंत्रयेत् अस्त्रेणालोड्य मृत्कां मां त्रिभागां
तां तु कारयेत् जले चैकं द्वादशधा तानि क्षिपेदस्त्रमुच्चरन्
एकं मूर्द्धादि नाभ्यंतं पठन् मूलं विलेपयेत् शेषं पादादि
नाभ्यंतं पठन् मूलं विलेपयेत् ततो नाभिमात्रोदके गत्वा
संकल्पं कारयेद्यथा ॐ अद्यामुकमासस्यामुकपक्षस्या
मुकतिथौ च मुकायामसुकदेवस्यामुकशर्माहं श्री
त्रिपुराप्रीतये तांत्रिकविधिना स्नानमहं करिष्ये इति सं
कल्प्य ततः प्राणायामऋष्यादिकरषडंगन्यासादिकं वि
धाय स्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य
क्रोंइत्यंकुशमुद्रया सूर्यमंडलात्तीर्थमावाहयेद्यथा

ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानितेरवे तेनसत्येनदे
वेप्तातीर्थान्देहिदिवाकर गंगेचयमुनेचैवगोदावरि
सरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु आ
वाहयामित्वांदेविस्नानार्थमिहसुंदरि एहिगंगेनम
स्तुभ्यंसर्वतीर्थसमन्विते इतितीर्थमावाह्य स्वपुरतः
कल्पिततीर्थसंयोज्य धेनुमुद्रयामृतीकृत्य मत्स्यमुद्र
याछाद्य कवचेनावगुंठ्यचक्रेणसंरक्ष्य अस्त्रेणछोटिका
भिर्दशादिग्बंधनंकृत्वा मूलमंत्रेणत्रिधाजप्त्वातीर्थ
शक्तिंध्यायेद्यथा सर्वानंदमयीमशेषदुरितध्वंसाम्ब
गांकप्रभां श्वेताब्जोर्ध्वकरद्वयेनदधतींपाशांकुशौव
क्रमात् दोर्भ्यांचामृतपूर्णहेमकलशंमुक्तात्तमाली
वरं गंगासिंधुसरिद्वयादिसहितांश्रीतीर्थशक्तिंभजे
इतितीर्थशक्तिंध्यात्वा तीर्थशक्तिमावाहयेद्यथा ॐ
क्रांक्रींक्रूंक्रैंक्रौंक्रः सर्वानंदमयेतीर्थशक्तेएह्येहिस्वा
हा इतितीर्थशक्तिमावाह्य सप्तधाजलमभिमंत्रये
द्यथा ॐनमोभगवति अंवेअंबालिके अंबिके महा
मालिनि एहि भगवति अशेषतीर्थालवाने क्रीं श्री
शिवजटाधिरूढे गंगेगंगांबिके स्वाहा इतिमंत्रेणज
लेसप्तधाभिमंत्र्य ह्रीं इत्यवलोक्य धेनुमुद्रयामृती
कृत्य तत्त्वत्रयंमूलेनजलेविन्यसेद्यथा मूलेनात्मत

श्री· १०

60

त्वात्मनेनमः मूलेनविद्यातत्वात्मनेनमः मूलेनशिवतत्वा
त्मनेनमः इतितत्वत्रयंजलेविन्यस्य तत्रश्रीचक्रंविभाव्य
स्वहृदयाद्देवीमावाहयेद्यथा मूलेनयोनिमुद्रया तज्ज
लमष्टधाभिमंत्रयेत् मूलांतेकामेश्वरपरिवारसहित
श्रीत्रिपुरादेव्या अभिषिंचयामिनमः अंजलिभिःसप्त।
छिद्राणिनिरुध्यमूलंपठन् त्रिर्निमज्योन्मज्जेत् मूलेन
कुंभमुद्रया स्वशिरसि त्रिरभिषिंच्ययामिनमः मूलांते
कामेश्वरपरिवारसहित श्रीत्रिपुरादेव्यास्तृप्यतां इति
त्रिपुराञ्जलिःसतर्प्य स्वहृदित्रिपुरादेवींसमानीयाचम्यत
रं मूलेनात्मतत्वायस्वाहा मूलेनविद्यातत्वायस्वाहा मू
लेनशिवतत्वायस्वाहा इतित्रिराचम्य तीरमारुह्य धौत
वाससी परिधाय यज्ञभस्मचंदनेवा मूलेनसप्तधाभि
मंत्रयेत् त्रिपुंड्रकमूर्ध्वपुंड्रकंवातिलकंवाकारयेत्ततः
इतिप्रातस्नानविधिः अथसंध्याविधिः ऊर्ध्वकृत्वाउमारे
ण शिवानंदेनयोगिना पूर्णाभिषेकयुक्तानां महासंध्या
विधीयते संध्याचतुर्विधाज्ञेया बालाकौमारयौवना प्रौ
ढानिष्कलयाचेति संध्यादेविप्रकीर्तिता प्रातःकालेम
हादेविविद्यावागीश्वरीतथा कामेश्वरीचमध्याह्ने सा
याह्नेत्रिपुरेश्वरी मध्यरात्रेमहादेवि ज्ञेयात्रिपुरसुंदरी
प्राङ्मुखस्त्वसमाविश्य पादौहस्तौप्रक्षाल्याचमेत् मूले

नात्मतत्वायस्वाहा मूलेनविद्यातत्वायस्वाहा मूलेन।
शिवतत्वायस्वाहा इतित्रिराचम्य ॐमणिधरिणिव।
ज्रिणि सर्ववशंकरिणि रक्षरक्षहूंफट्स्वाहा इतिमं
त्रेणशिखांवद्ध्वा पुनराचमेत् प्राणायामऋष्यादिक
रषडंगन्यासान्कुर्यात् स्वपुरतोजले तीर्थंपरिकल्प्य
पूर्ववत्तीर्थान्यावाहयेत् मूलेनाष्टधाभिमंत्र्य ते
नजलेनतत्वमुद्रया कुशेनाकारादिक्षकारांतैःसविं
दुभिर्नमोंतैः स्वशिरसिसंप्रोक्षयेत् अंनमः आंनमः
इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंन
मः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः
अःनमः कंनमः खंनमः गंनमः घंनमः ङंनमः चं
नमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठंन
मः डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः
धंनमः नंनमः पंनमः फंनमः बंनमः भंनमः मं
नमः यंनमः रंनमः लंनमः वंनमः शंनमः षंन
मः संनमः हंनमः ळंनमः क्षंनमः इतिमातृका
क्षरैःस्वशिरसिसंप्रोक्षयेत् अशक्तोमूलेनवारत्रयं
स्वशिरसिसंप्रोक्षयेत् ततःदक्षहस्तेनजलमादा
य वामहस्तेनाछाद्य यंरंवंलंहंएभिःपंचभौतिकै
र्मंत्रैः सप्तभिरभिमंत्रयेत् मूलमंत्रेणत्रिभिमंत्रये

श्री॰ ११ ५५

त् तज्जलं वामहस्तेन दक्षहस्तेन बिंदुभिः तत्त्वमुद्रया मूलेन स्वशिरसि त्रिः संप्रोक्षयेत् अवशिष्टं तज्जलं वामहस्ते निधाय तत्तेजोरूपं तज्जलं इडया कृष्य देहांतःस्थितं पापं प्रक्षाल्येत् तज्जलं कृष्णवर्णं पिंगलया निर्गतं मनसा दक्षहस्ते तज्जलं गृहीत्वा स्ववामभागे ज्वलद्वज्रशिलायां ध्यात्वा तन्मंत्रं पठेद्यथा ॐ ह्रीं पाप्मने फट् इति पापं पतास्त्रमंत्रेण तस्यां शिलायां तज्जलं निक्षिपेत् हस्तौ प्रक्षाल्य मूलेन वामहस्ते जलं गृहीत्वा पठेद्यथा अमृतमालिनी स्वाहा इति दक्षहस्तेन ऊर्ध्वैः स्वशिरसि त्रिः संप्रोक्षाचमेद्यथा मूलेनात्मतत्त्वाय स्वाहा मूलेन विद्यातत्त्वाय स्वाहा मूलेन शिवतत्त्वाय स्वाहा मूलेन सर्वतत्त्वाय स्वाहा इति त्रिराचम्य ततो रक्तचंदनमिश्रितजलांजलिं गृहीत्वा ऊर्ध्वसूर्ये त्रिरर्घ्यं दत्वा ॐ ह्रां ह्रीं हंसः श्रीमार्तंडभैरवाय प्रकाशशक्तिसहिताय सूर्याय इदमर्घ्यं परिकल्पयामि स्वाहा इति ऊर्ध्वसूर्याय त्रिरर्घ्यं दत्वा स्वात्मानं सूर्यमंडले मूलदेवीं नीत्वा तत्र विधिवद्ध्यात्वा ऐं कएईलह्रीं त्रिपुरे विद्महे क्लीं हसकलह्रीं कामेश्वरि धीमहि सौः सकलह्रीं तन्नो शक्तिः प्रचोदयात् श्रीत्रिपुरादेव्या इदमर्घ्यं परिकल्पयामि स्वाहा अनया मूलगायत्र्या चतस्रः संध्याः सूर्यमंडले मूलदेव्यै त्रिरर्घ्यं द

त्वा यथाशक्तिर्मूलंगायत्रीं जप्त्वा गुह्येतिमंत्रेण सम
र्प्य ततः प्राणायामत्रयम् ऋष्यादिकरषडंगन्यासान् विधा
य यथाशक्तिः साधकेशः मूलं जप्त्वा ततः शिवे पुनः
प्राणायामं ऋष्यादिकरषडंगन्यासान् कृत्वा गुह्येति
मंत्रेण समर्प्य सूर्यमंडलेभ्यो देवीतेजः स्वस्वस्थाने
समानीय मूलदेवीं स्वहृदि समानीय तत्रविधिवत्ती
र्थानि विसर्जयेत् इति संध्याविधिः अथ तर्पणविधिः
पूर्ववद्दाचम्य देवि प्राणायामत्रयं परं ऋष्यादिकर
षडंगानि न्यासं कुर्यात् ततः परं पूर्ववत्तीर्थमावाह्य
मूलेनामृतं विभाव्य च तस्मिन् जले साधकेशः यंत्रं
ध्यात्वा ततः शिवे तस्मिन्देवीं समावाह्य स्वहृदयात्प
रिवारकः षडंगेन सकलीपरमीकृत्य कुंडलिनीप्र
योगेनामृतेन परिवारदेवता तर्पयेत् यथा कामेश्व
रीनित्यां तर्पयामि भगमालिनीनित्यां तर्पयामि नित्यक्लि
न्नानित्यां तर्पयामि भेरुंडानित्यां तर्पयामि वह्निवासि
नीनित्यां तर्पयामि वज्रेश्वरीनित्यां तर्पयामि शिवदूती
नित्यां तर्पयामि त्वरितानित्यां तर्पयामि कुलसुंदरीनित्यां
तर्पयामि नित्यानित्यां तर्पयामि नीलपताकानित्यां तर्पया
मि विजयानित्यां तर्पयामि सर्वमंगलानित्यां तर्पयामि
ज्वालामुखीनित्यां तर्पयामि [illegible]चित्रानित्यां तर्पयामि त्रिपु

श्री॰ १२ 12

[illegible]नंदनाथस्तृप्यतां परम[illegible]नंदनाथस्तृप्यतां परशिवा
नंदनाथस्तृप्यतां पराशक्तिदेव्यंबास्तृप्यतां कौलेश्वरानं
दनाथस्तृप्यतां कुलेश्वरानंदनाथस्तृप्यतां कौ[illegible]श्वरी
देव्यंबास्तृप्यतां [illegible]लीदेव्यं[illegible] दिवौ[illegible]स्तृप्य
तां भोगानंदनाथस्तृप्य[illegible]नाथस्तृप्यतां [illegible]
यानंदनाथस्तृप्यतां [illegible]नानंद[illegible]तृप्यतां [illegible]
गुरुस्तृप्यतां गगनानंदनाथस्तृप्यतां वि[illegible]
प्यतां विमलानंदनाथस्तृप्यतां सदानंदनाथस्तृप्यतां
भुवनानंदनाथस्तृप्यतां लीलानंदनाथस्तृप्यतां स्वात्मा
नंदनाथस्तृप्यतां प्रियानंदनाथस्तृप्यतां मानवौघगुरु
स्तृप्यतां प्रकाशानंदनाथस्तृप्यतां परमगुरुस्तृप्यतां
परापरगुरुस्तृप्यतां परमेष्ठिगुरुस्तृप्यतां सर्वज्ञाख्यद
यशक्तिस्तृप्यतां नित्यतृप्ताशिरःशक्तिस्तृप्यतां अनादि
बोधाशिखाशक्तिस्तृप्यतां स्वतंत्रताकवचशक्तिस्तृप्य
तां नित्यमलुप्तानेत्रशक्तिस्तृप्यतां अनंतास्त्रशक्तिस्तृप्य
तां अणिमासिद्धिस्तृप्यतां लघिमासिद्धिस्तृप्यतां महि
मासिद्धिस्तृप्यतां ईशित्वसिद्धिस्तृप्यतां वशित्वसिद्धिस्तृ
प्यतां प्राकाम्यसिद्धिस्तृप्यतां भुक्तिसिद्धिस्तृप्यतां इच्छा
सिद्धिस्तृप्यतां प्राप्तिसिद्धिस्तृप्यतां सर्वकामप्रदासिद्धिः
स्तृप्यतां ब्राह्मीसिद्धिस्तृप्यतां माहेश्वरीस्तृप्यतां कौमारीस्त

मोहिनकामेश्वरचा

नातृप्यतां [illegible]वीतृप्यतां वाराहीतृप्यतां इंद्राणीचामुंडा
तृप्य[illegible] महालक्ष्मीतृप्यतां सर्वसंक्षोभिणीमुद्रातृप्य
तां सर्वविद्राविणीमुद्रातृप्यतां सर्वाकर्षिणीमुद्रा
तृप्यतां सर्ववशंकरी[illegible]तां सर्वोन्मादिनीमुद्रा
तृप्यतां महांकुशा[illegible]तां त्रिखंडामुद्रातृप्यतां
बीजमुद्रातृप्यतां खेचरीमु[illegible]तृप्यतां योनिमुद्रातृप्य
तां कामाकर्षिणीनित्याकला बुद्ध्याकर्षिणीनित्याकला
तृप्यतां अहंकाराकर्षिणीनित्याकला· शब्दाकर्षिणी
नित्याकला· स्पर्शाकर्षिणीनित्याकला· रूपाकर्षिणी
नित्याकलातृप्यतां रसाकर्षिणीनित्याकलातृप्यतां
गंधाकर्षिणीनित्याकलातृप्यतां चित्ताकर्षिणीनित्या
कलातृप्यतां धैर्याकर्षिणीनित्याकलातृप्यतां स्मृ।
त्याकर्षिणीनित्याकलातृप्यतां नामाकर्षिणीनित्याक
लातृप्यतां बीजाकर्षिणीनित्याकलातृप्यतां आत्माक
र्षिणीनित्याकलातृप्यतां अमृताकर्षिणीनित्याकला
तृप्यतां शरीराकर्षिणीनित्याकलातृप्यतां अनंगकुसु
मातृप्यतां अनंगमेखलातृप्यतां अनंगमदनातृप्य
तां अनंगमदनातुरातृप्यतां अनंगरेखातृप्यतां अनंग
वेगिनीतृप्यतां अनंगांकुशातृप्यतां अनंगमालिनीतृ
प्यतां सर्वसंक्षोभिणीशक्तितृप्यतां सर्वविद्राविणीश

श्री· ख 13

क्तिंतर्प्पयामि सर्वाकर्षिणीशक्तिंतर्प्पयामि सर्वा[illegible]शक्तिंत
र्प्पयामि सर्वसंमोहिनीशक्तिंतर्प्प[illegible] सर्वस्तं[illegible]शक्तिंतर्
प्पयामि सर्वजृंभिणीशक्तिंतर्प्पयामि सर्ववशंकरीशक्तिंतर्प्पयामि
सिंधुरमावहं दयितयादत्तं च पेयादिभिः किंचिच्चंचल
रक्तपंकजदृशा सानंदमुद्वीक्षितं वामे स्वाङ्कविभूद्रुह्म

द्विकवलं पाणौ निधायात्मिके वंदे पात्रमहं द्वितीप
मधुनानंदैकसंवर्द्धनं ॐ विद्यातत्वं शोधयामि स्वाहा २
सर्वाम्नायकलाकलापकलितं कौतूहलोद्योतितं वे
शेषेंद्र महेंद्रशंभुवरुणब्रह्मादिभिः सेवितं ध्यानंदे
वगणैः परं मुनिगणैर्मीनार्थिभिस्सर्वदा वंदे पात्रम
हं तृतीयमधुना स्वात्मावबोधक्षमं ॐ शिवतत्वं शोध
यामि स्वाहा ३ मद्यं मीनरसावहं हरिहरब्रह्मादिभिः
पूरितं मुद्रामैथुनधर्मकर्मनिरतं ज्ञानात्मनिष्ठाश्रये
श्राचार्यार्चितमष्टभैरवकलामांसेन संशोधितं पाया
त्पंचमतत्वकारतिलयं पात्रं चतुर्थं नमः ॐ प्रकृतित
त्वं शोधयामि स्वाहा ४ आधारे भुजगाधिराजवलये
पात्रं महीमंडले मद्यं समसमुद्रवारिपिशितं वाह्ये
च दिग्दंतिनः सोऽहं भैरवमर्चयन्प्रतिदिनं नागाग
णैः रत्नैः तारादिप्रमुखैः हरा हरगणैराज्ञाकरैः किंक
रैः ॐ पुरुषतत्वं शोधयामि स्वाहा ५ पात्रं चामरभद्र
पीठपरमानंदोदयं दायकं वाजीदंतिमनोहरं सुखक
रं साम्राज्यसाम्राज्यदं नानाव्याधिभवाधकारहरणं ज
न्मांतरं खं समं श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं
नमः ॐ मनस्तत्वं शोधयामि स्वाहा ६ जाग्रत्स्वप्नसुषु
प्तिवीथपवनं चैतन्यसात्तिपदं विद्युद्भास्करवह्निचं

श्री॰
१०२
102

इयत्तु योज्योतिष्कला व्यापितं वामापिंगलमध्यगा त्रिव
लया सत्कुंडलीवोर्ध्वगा पात्रे सम्मम पूरणेन तरुणानंद
प्रदं पातु मां ओं बुद्धितत्त्वं शोधयामि स्वाहा ७ खड्गपाडक
मंगलं सतिलकं कंठे हि सारस्वतं प्राज्ञो वीरवलशौर्यका
र्यहरणं देहस्थिते कारणं वांछासिद्धिकरं मनःस्थिति
करं वशंपजगयोषितो पात्रे चाहं ममष्टसिद्धिकरणं श्री
दप्रसन्नं भजे ओं अहंकारतत्त्वं शोधयामि स्वाहा ८ सर्वा
नंदकरं सदाशिवपदं सर्वार्थसंपत्प्रदं साम्राज्यार्थ
करं समस्तसुखदं चाज्ञानविध्वंसनं आयुःकीर्तियशो
विवर्धनकरं संसारमोहच्छिदं पात्रे लक्ष्मगुणात्मकं च न
वमं श्रीप्रौढप्रतापं भजे ओं शक्तितत्त्वं शोधयामि स्वाहा ९
बलविक्रममहेशानां देवानां च विशोधनः दुर्लभं पाव
नं पात्रे दशमे प्रणमाम्यहं ओं भैरवतत्त्वं शोधयामि स्वा
हा १० पापघ्नं शांतिशुभदं दिव्यं स्वादसुखालयं पात्र
मेकादशं वंदे शुभं सेवासुखागतं ओं सर्वतत्त्वं शोधया
मि स्वाहा ११ पात्रं कृत्वा करे मंत्री सर्वकामलभेत्सुखी इ
हलोके श्रियं भुक्त्वा देहांते भैरवो भवेत् १ देहस्याखि
लदेवतागणमुखाः क्षेत्राधिपा भैरवाः योगिन्यो वटुका
श्च यक्षपितरः पैशाचिकाश्चेटकाः अन्ये भूचरखेचराः प्र
तिपगा वेतालभूतग्रहाः तृप्ताः सुः कुलपुत्रपौत्रपितरः

पानंममंमाह्निकं २ वामेनामारमणकुशलादक्षिणे
वालिपात्र मग्रेमुद्राश्रणकवट्टकौहृकरस्योमस्तुष्टिः
तंत्रीवीणासरसमधुरासङ्गतः सत्कथायां वामाचा
रःपरमगहनोयोगिनामप्यगम्यः अलिपिशितपरे
श्रीभोगपूजापरोहं बहुविधकुलमार्गारंभसंभावि
तोहं पशुजनविमुखोहंभैरवीमाश्रितोहं गुरुचर
णरतोहंभैरवोहंशिवोहं १ सकलविकलपूजानित्य
भावमयोहं विविधविशुधमंत्रैर्नित्यपूजारतोहं स
हजपरमभावदेवतापूजकोहं शिवचरणगतोहं
भैरवीमाश्रितोहं २ सहजपरमदीक्षामंत्रशुद्धात्म
कोहं सकलविविधदीक्षायंत्रजापीसदाहं सहजप
रममंत्राराधितानंदितोहं शिवशरणगतोहंभैरवी
माश्रितोहं ३ अतिशयविमलोहंसच्चिदानंदितोहं
सहजपदपरोहंदीर्घभक्त्याश्रितोहं अभिजनकुल
तोहंमंत्रशुद्धात्मकोहं शिवशरणगतोहंभैरवी
माश्रितोहं ४ श्रवणमननचिंताध्यानभावात्मको
हं सहजपरमविद्यानित्यवीर्यात्मकोहं नियतसु
खरतोहंभक्तिभावात्मकोहं शिवशरणगतोहंभै
रवीमाश्रितोहं ५ विरहितजनकोहंत्यक्तसर्वभ
योहं निरमितविषयोहंप्राकृतैःकातरोहं जनसु

श्री॰
१०३
103

स्वरहितोहं पूर्वधर्मार्जितोहं शिवशरणगतोहं भैरवी
माश्रितोहं ६ अनुमितस्वजनोहं संसृतेर्निर्विण्णोहं सह
जपरप्रतिज्ञापूज्यपूजात्मकोहं परहितपरकार्यारा
धनातत्परोहं शिवशरणगतोहं भैरवीमाश्रितोहं ७
स्वजनपरित्यक्तोहं दुर्जनैर्द्वेषितोहं परिजनरहितो
हं साधुसंमानितोहं पशुजनविमुखोहं सज्जनाराध
कोहं शिवशरणगतोहं भैरवीमाश्रितोहं ८ शिवो
हं शक्तिरूपोहं देवोहं दनुजोप्यहं यक्षोहं मनुजश्चा
हं सर्वोहं सर्वदाप्यहं ९ करे पात्रं मुखे स्तोत्रं मानं दो
ह्रदयांतरे भक्तिर्गुरुपदांभोजे शरणं किमतः परं १०
एकेन शुष्कचणकेन घटं पिबामि वापीं पिबामि सह
सालवणार्द्रकेन आस्वादयामि समले रोहितमत्स्यखं
डं गंगां पिबामि यमुनां सह सागरेण १ वामे चंद्रमुखी
मुखे च मदिरापात्रं करांभोरुहे मूर्ध्नि श्रीगुरुचिंतनं
भगवतीध्यानास्पदं मानसं जिह्वायां जपसाधने परि
णतिः कौलक्रमाभ्यासने येषां ते नियतं पिबंति सुर
सं ते भुक्तिमुक्तीगताः १ पीत्वा पीत्वा पुनः पीत्वा याव
त्पतति भूतले पुनरुत्थाय वै पीत्वा पुनर्जन्म न विद्य
ते १ धर्माधर्महविर्दीप्तिः स्वात्माग्नौ मनसा स्रुचा सुषु
म्णावर्त्मना नित्य मक्षवृत्तीर्जुहोम्यहं २ प्रकाशाका

शहस्ताभ्यां मवलंब्योन्मनीस्तवं पर्मायर्मकलाश्रे
ह हस्तांविवश्कोत्रहोम्यहं २ यावन्नचलतेदृष्टि यांव
न्नलतेमनः तावद्ध्यानेप्रकर्तव्यं पश्चपानमतःपरं
४ वलिपात्रस्थनिमीत्यादिकं तस्मात्रांतरेगृहीत्वा
वहिर्गत्वाशुद्धदेशे चतुरस्त्रहृत्तत्रिकोणंमंडलंकृ
त्वा तन्मध्येउच्छिष्टभैरवंध्यायेत् गदात्रिशूलडमरुं
पात्रहस्तंत्रिलोचनं कृष्णाभंभैरवंध्यायेत् सर्ववि
घ्ननिवारणाम् ॐॐॐउच्छिष्टभैरवआगच्छ २ एहि
२ वलिंगृह्ण २ हुंफट्स्वाहा इतिपात्रस्थवलि····
·· मंडलेनिक्षिप्य योनिमुद्रयोच्छिष्टभैरवंविसृज्य
हस्तौपादौप्रक्षाल्यपात्रेजलपूर्णंगृहीत्वा स्वहृदि
देवीस्मरन् पूजागृहद्वारेगत्वा अंतःप्रविश्य स्वा
सनेोपविश्यपात्रप्रशंसाविधायेत्यं शांतिस्तोत्रंपठे
च्छिवेवीरायेनपरानंदपदंप्राप्स्यतिनिस्पृहः योगि
नीचक्रमध्यस्थं मातृमंडलवेष्टितं १ नमामिशिर
सानाथं भैरवभैरवीप्रियं अनादिघोरसंसार व्या
धिध्वंसैकहेतवे नमःश्रीनाथवैद्याय कुलौषधिप्र
दायिने आपदोदुरितंरोगाः समयाचारलंघनात्
१ येसर्वेत्रव्यपोहंत्त दिव्यचक्रस्यमेलनात् आयुरा
रोग्यमैश्वर्यं कीर्तिर्लाभःसुखंजयः १ कांतिर्मनो

श्री·
१४
105

रथश्चास्तु प्रीताः सर्वाश्च देवताः २ जयंतु देव्यो हरपाद
पंकजं प्रसन्नवामामृतमोक्षदायकं अनंतसिद्धांत
गतिप्रबोधकं नमामि चाष्टाष्टकयोगिनीगणं २ सं
पूजकानां यतींद्रयोगींद्रतपोधनानां देशस्य राष्ट्रस्य
कुलस्य राज्ञः करोतु शांतिं भगवान्कुलेशः १ नंदं
तु साधककुलान्वयदर्शिकायै स्पष्टाध्वनाख्यचतुरु
क्रममहान्वयायै नंदंतु सर्वकुलकौलरताः परे ये अ
न्ये विशेषपदभेदकशांभवाये १ नंदंतु सिद्धगुरवः
स्वगुरुक्रमोऽथ ज्येष्ठानुगाः समयिनो वटुकाः कुमार्यः
षट्योगिनीप्रवरवीरकुलप्रसूताः नंदंतु भूमित
नयो द्विजसाधुलोकाः १ नंदंतु नीतिनिपुणा निरव
द्यनिष्ठा निर्मत्सरा निरुपमा निरुपद्रवाश्च नित्या
निरंजनरता गुरवो निरीहाः शांताश्च शांतमनसोस्त
तशोकशांताः १ नंदंतु योगनिरताः कुलयोगयु-
क्ताः आचार्यसामयिकसाधकपुत्रकाश्च गावो द्विजा
युवतयो पतयः कुमार्यो धर्मे भवंतु निरताः गुरुभ
क्तियुक्ताः १ नंदंतु साधककुलान्यणिमादिनिष्ठाः
शापाः पतंतु द्विषतां कुलयोगिनीनां साशांभवी स्फु
रतु कापि समाप्यवस्था यस्यां गुरोश्चरणपंकजमेव ला
भं १ याश्चक्रक्रमभूमिकावसतयो नाडीषु याः संस्थि

ताः याकामरूमेरौमहापनिलयायाः संस्थितायात्र
षु उड्डीमोर्मिमहानंतरंगनिलयानिःश्वासवाम
श्वया स्नांदव्योरिष्ठभद्यमहत्तणपरास्तपंतुकौला
र्चिताः १ यादिव्यक्रमपालिकाःक्षितिगतायादेवता
लोयगा यानित्यंप्रथिताःप्रभाःशिवगतायामात
रिश्वाश्रयाः याव्योमामृतमंडलामृतमयायाः स
र्वगाःसर्वदा ताःसर्वाःकुलमार्गपालनपराः शांतिं
प्रयछंतुमे १ ऊर्ध्वंब्रह्मांडतोवादिविगगनतलेभू
तलेनिष्कलेवा पातालेवानलेवापवनसलिलयो पातालेवान
र्यत्रकुत्रस्थितावा क्षेत्रेपीठोपपीठादिषुचकृतप
दाधूपदीपादिकेनैः प्रीत्यादेव्यासदानःशुभबल
विधिनापांतुवीरेंद्रवंद्याः १ भूतागंधर्वविद्याधर
ऋषिपितृयक्षामहाहिप्रभूतायोगीशाश्चारणाः
किंपुरुषमुनिसुराश्चक्रगाःपांतुसर्वे १ सत्यंचेद्ग
रुवाक्यमेवपितृदेवाः शेषवद्योगिनी प्रीतिश्चे
त्परदेवताश्चयदिचेत्वेदाःप्रमाणंचचेत् शाक्ती
यंयदिदर्शनंभवतिचेदाज्ञेयमेषास्तिचेत् सत्यं
वापिचकौलिकाश्चयदिचेत्स्यान्मेजयःसर्वदा १
त्वंपांतुमातरःसर्वाः समुद्राःसगणाधिपाः योगि
न्यःक्षेत्रपालाश्च ममदेहेव्यवस्थिताः १ शिवायव

श्री
१०५
105

निपर्यंतब्रह्मादिस्तंभसंयुते कालाद्यादिशिवांतेव
जगद्यत्तेनतत्प्यते १ शांतिस्तोत्रे विधायेत्थं वीरवंद
नयथाशिवे स्तवेहीरानमेहीरा मंत्रसिद्धिः प्रजा
यते १ जगत्त्रयाभ्यर्चितशासनेभ्यः परार्थसंपादन
कोविदेभ्यः समुद्धृतक्लेशमहोरगेभ्यो नमो नमः
साधकसाधकेभ्यः १ प्रहीनमायासववासनेभ्यः
सर्वार्थनत्वोदितसाधनेभ्यः सर्वप्रजाभ्युद्धरणोदिते
भ्यो नमो नमः साधकसाधकेभ्यः १ निस्तीर्णसंसारम
हार्णवेभ्य स्वक्षालतोन्मूलनतत्परेभ्यः जरारुजामृ
त्युनिवारकेभ्यो नमो नमः साधकसाधकेभ्यः १ सद्ध
र्मकर्माकरभाजनेभ्यो निर्वाणमार्गोत्तमदेशिकेभ्यः
सर्वज्ञसंपूर्णमनोरथेभ्यो नमो नमः साधकसाधके
भ्यः १ लोकानुकंपाभ्युदितादरेभ्यः कारुण्यमैत्रीप
रिभाविनेभ्यः सर्वार्थचर्यापरिपूरकेभ्यो नमो नमः
साधकनायकेभ्यः १ विध्वस्तनिःशेषकुवासनेभ्यो
ज्ञानाग्निनादग्धमलेंधनेभ्यः प्रज्ञाप्रतिज्ञापरिपूरके
भ्यो नमो नमः साधकनायकेभ्यः १ सर्वार्थिताशाप
रिपूरकेभ्यो वैनेयपद्माकरबोधकेभ्यः विस्तीर्णस
द्वीर्यगुणाकरेभ्यो नमो नमः साधकनायकेभ्यः १ ब्र
नेतकर्माजितशासनेभ्यो ब्रह्मेंद्ररुद्रादिनमस्कृते

भ्यः परस्परानुग्रहकारणेभ्यो नमोनमः साधका
नायकेभ्यः १ विभयस्मृतादिमहाभयेभ्यो प्रपंचका
चारपरायणेभ्यः समस्तसौभाग्यकलाकरेभ्यो नमो
नमः शांभवविशांभवेभ्यः १ विभयरुद्धकर्मजवासने
भ्यः समेततोज्ज्वलमहायशोभ्यः लब्धामलज्ञानक
लास्पदेभ्यो नमोनमः शांभवविशांभवेभ्यः १ सर्वाग
मोबोधिमहाब्धवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः
श्रीवीरचर्याचरणक्षमेभ्यो नमोनमः शांभवविशांभ
वेभ्यः १ श्रीमंत्रकोटिद्युतिभूषणेभ्यो द्वात्रिंशदुल्ला
सदशातिगेभ्यः अद्वैततत्त्वामृतभाजनेभ्यो नमो
नमः शांभवविशांभवेभ्यः १ षट्त्रिंशतालक्षणभूषि
तेभ्यः प्रोत्फुल्लपद्माकरलोचनेभ्यः प्रतप्तचामीकर
विग्रहेभ्यो नमोनमः शांभवविशांभवेभ्यः १ संबोध
संभारसुसंस्थितेभ्यः संसारनिर्वाणविदर्शकेभ्यः
महाकृपावेष्टितमानसेभ्यो नमोनमः शांभवविशां
भवेभ्यः १ परैकविज्ञानरसाकुलेभ्यो वामाश्रिताचा
रभयानकेभ्यः स्वातंत्र्यविध्वस्तजगत्त्रयेभ्यो नमोन
मः शांभवविशांभवेभ्यः १ श्मशानचर्यासमहाफले
भ्यो मोहांधकारापहृतिक्षमेभ्यः परस्पराज्ञापरि
पालकेभ्यो नमोनमः शांभवविशांभवेभ्यः १ विधूत

श्री॰ केशालिकपालिकेभ्यः सुरासवारक्तविलोचनेभ्यः न
१९ वीनकांतारनतत्परेभ्यो नमोनमः भैरवभैरवेभ्यः १
106 विभूतिलिप्तांगदिगंबरेभ्यश्चिताग्निधूममालिभयानके
भ्यः कपालपात्रामृतपानकेभ्यो नमोनमः भैरविभै
रवेभ्यः १ सिद्धाष्टकाथानमहामुनिभ्यः श्रीभैरवावा
रकृतादरेभ्यः स्वाधीनतानित्यकृतान्विर्जरेभ्यो नमोनमः
भैरवभैरवेभ्यः १ प्रशांतशास्त्रार्थविचारकेभ्यो निर्द्वं
तनानारसकाव्यकेभ्यः निरस्तनिःशेषविकल्पनेभ्यो
नमोनमः भैरविभैरवेभ्यः स्वात्मैकभावांतविनाशये
भ्यः सायुज्यसाम्राज्यसुखाकरेभ्यः श्रीसच्चिदानंदित
विग्रहेभ्यो नमोनमः भैरविभैरवेभ्यः १ पराप्रसादा
स्वदमानसेभ्यो ब्रह्माद्वयज्ञानरसाकुलेभ्यः शिवोह
मित्याश्रितचेतनेभ्यो नमोनमः भैरविभैरवेभ्यः १
सर्वथासर्वदानंदं सर्वंघटपटादिमत् जगज्जानित
विस्तारं ब्रह्मेदमितिवेद्महे १ अहमेवपरोहंसः शि
वःपरमकारणं मत्त्राणेसतपश्चात्मा लीनःसमर
सीगतः १ सच्चिदानंदनिलयं परात्परमकारणं शिवा
हयप्रकाशाढ्यं श्यामलेधामधीमहि १ एकाकीनिस्पृ
हःशांतःपाणिपात्रदिगंबरः कदाशंभोभविष्यामिक
र्मनिर्मूलनक्षमः १ हालांपिबेत्साधकमंदिरेषु स्वपे

त्रिशायांगणिकागृहेषु गृहेगृहेचवर्णमेवकुर्वन्
विराजितेसाधकचक्रवर्ती । शाह्वलमयेस्वछे दे
वित्रिपुरसुंदरि यथाशक्तिजपंपूजां गृहाणपरमे
श्वरि । तेनैवसाधकाः सर्वेविनश्यंतुविहीषिकाः स्व
वस्याशोभवीमेस्तुप्रसन्नोस्तुगुरुःसदा । अनेनवीर
स्तवकीर्तनेनसमुहृतक्लेशस्रवासनोहं संसारको
तारमहार्णवेस्मिन् निमज्जमानंजगदुद्धरेयं । ततः
ताम्रादिपात्रेगंधाक्षतपुष्पे अर्घ्यादिकंगृहीत्वा ॐ
नमोविवस्वतेब्रह्मन् भास्वतेविष्णुतेजसे जगत्सवि
त्रेशुचये सवित्रेकर्मदायिने ॐक्रांक्रींहंसःसूर्याय
एषतेअर्घ्योनमः इतिसूर्यायअर्घ्यंत्रिर्दत्वा ततःकृतां
जलिर्वद्धा यत्ताछिद्रंजपाछिद्रं यछिद्रंसृजनेमम
सर्वंतदछिद्रमस्तु भास्करस्यप्रसादतः इत्यछिद्रा
वधारणंकृत्वा स्वात्मानंकामकलारूपंज्ञात्वा सुखंवावि
हरेछिवे इतिश्रीनित्यपूजायापद्धतिंपरमेश्वरि गु
ह्यागुह्यतमांनित्यं गोपनीयांस्वयोनिवत् । इतिश्री
रुद्रयामलेतंत्रेश्रीमहात्रिपुरापद्धतिसमाप्ता ॥

श्री॰ १०७ 107

मूर्द्धानमितिभरद्वाजऋषिः वैश्वानरोदेवता
त्रिष्टुपछंदा पूर्णाहुति होमेविनियोगः मू
र्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआयात
मग्निंकविंसम्राजमतिथिंज नानामासन्ना
पात्रंजनयंतदेवास्वाहा १ ॥

ॐश्रीगुरवेनमः नमोगणेश्वरायनमः श्रीदेव्युवाच ॐदेवदे
वमहादेवभक्तानांप्रीतिवर्धन यत्त्वयितंपुरानाथकिमर्थंनप्र
काशते १ राजराजेश्वरीदेव्यास्त्रिपुरायाःस्वभावकं कवचंपर
मेप्रीतिः कथयस्ववृषध्वज २ श्रीभैरवउवाच सहस्रलक्षवा
राणिवारितासित्वमंपुनःपुनः स्त्रीस्वभावान्महादेवि पुनस्त्वंपरि
पृच्छसि ३ अत्यंतगोपनेगुह्यंकवचंसर्वकामदं तथापिकथ
याम्यद्यनवप्रीत्यावरानने ४ ॐअस्यश्रीराजराजेश्वरीमहा
त्रिपुरसुंदरीकवचमंत्रस्य श्रीदक्षिणामूर्तिर्ऋषिः विराड्
छंदः अद्वैतरूपिणीदेव्यारायनेचिच्छक्तिः पद्माबीजं श्री
महात्रिपुरसुंदरीराजराजेश्वरीदेवता ममयथोक्तफल
साधने श्रीदेवीप्रीत्यर्थेजपेपाठेविनियोगः इतिकरन्या
सः ऐं २ प्रथमकूटं अंगुष्ठाभ्यांनमः क्लीं २ तर्जनीभ्यांस्वा
हा सौः ३ मध्यमाभ्यांवषट् ऐं २ अनामिकाभ्यांहुं क्लीं २
द्वितीयकूटं कनिष्ठिकाभ्यांवौषट् सौः ३ तृतीयं अस्त्रायफ
ट् एवंषडंगाः १ हृदयायनमः २ शिरसेस्वाहा ३ शिखायै
वषट् ४ कवचायहुं ५ द्वितीयं नेत्रत्रयायवौषट् सौः ३
तृतीयकूटं अस्त्रायफट् अथध्यानम् बालार्कमंडला
भासंचतुर्बाहुंत्रिलोचनाम् पाशांकुशशरांश्चापंधार
यंतींशिवांभजे ॐभैरवीपातुपूर्वमे देवीत्रिपुरभै
रवी सुंदरीवदनेबाला पातुसर्वत्रसिद्धिदा ५ ऐं
श्रीकंठेसदापातु त्रिपुराख्यासरस्वती अघोरेदेव
श्रीकंठेसदापातु त्रिकूटंतुसदापा
तापातु सिद्धेश्वरीललाटके ७ त्रिकूटंतुसदापा

त्रिक
१

त त्रिपुरापरमेश्वरी हृदयेव्यान्महाविद्या राजरा
जेश्वरीचसा ८ मालिनीनाभिदेशेव्या न्महात्रिपु
रभैरवी लोपामुद्रागुदेपातु देवीत्रयोदशीपरा
९ मेढ्रंसात्रिपुरापातु त्रिपुरेशीसदाप्रदा ह्रीं
पातुगुह्यदेशेतु कामेश्वरीहरप्रिया १० श्रीपातु
सर्वगात्रेषु निर्मलात्रिपुरेश्वरी हंसश्चासादिनिः
श्वासं परानिर्वाणसुंदरी ११ हरप्रियाब्रह्मरंध्रे
पायान्मेपरदेवता रतिनाथाललाटेव्या न्नेत्रे
वाग्भवमालिनी १२ श्रोत्रेरतिप्रियापातु घ्राणे
शक्रप्रियावतु कपोलेपातुसर्वत्र अणिमाप
श्चिमेतथा ओष्ठेपुष्पप्रियापातु दंतेप्राणास्त्वरक्षतु
जीवोजिह्वाप्रदेशेतु ब्रह्माव्यात्कूर्परेतथा १४ हंसः
पृष्ठेसदापातु पृथ्वीसर्वांगकेवतु हृल्लेखाहृदये
व्यातु स्तनौपातुस्मरप्रिया कोथःऊरूसदापातु पि
नाकीलिंगलोचरे शीर्षादिपादपर्यंते सर्वांगेपर
मेश्वरी १८ व्यायाद्वाग्भवःपातु कामराजोहृदंबु
जे त्रैलोक्यडामरंपातु ब्रह्मरंध्रेतुसर्वदा शीर्षहृ
दत्रयेपातु तथाकंठेसदावतु सर्वमंत्रेकपोलेव्या
त्सर्वं सर्वत्ररक्षतु अणिमापश्चिमेपातु लघिमाचो
त्तरेतथा पूर्वेव्यान्महिमासिद्धि रीशितादक्षिणेव
तु १९ वशित्वावायुनिलये पेशेशाकाम्यसिद्धिदा
भुक्तिसिद्धिस्तथाग्नेय्या मिच्छासिद्धिश्वरात्तसे २०

लोपामुद्रागुदेपातु
दे[redacted]शीपरा
मुवोसं
लोपामुद्रा[redacted]
गंडौपायात्सदावतु
पार्वतीमांललाटे
व्यान्नेत्रेवाग्भवमा
लिनि ८

ग्रयःपातु प्राप्तिसिद्धिर्मां हसिद्धिस्तथोर्ध्वके ब्रह्माणीपू
र्वेदिग्भागे माहेश्वरीपातु पश्चिमे २१ कौमारी दक्षिणे पा
तु उत्तरे शाक्रवल्लभा येशान्यां वैस्नवीपाया द्वाराही
वायुमंडले २२ चामुंडा नैरृते पातु महालक्ष्मीर्धनंज
ये सर्वसंक्षोभिणीमुद्रा मूलाधारे सदावतु सर्ववि
द्राविणीपातु स्वाधिष्ठाने सुरेश्वरी सर्वाकर्षणमु
द्राख्या मणिपूरे वरानने २४ सर्ववशा सर्वदा पातु हृ
दये परमेश्वरी मुद्रा सर्वोन्मदा पातु हृदयोपरि सुंद
रि २५ विशुद्धिचक्रे देवेशि पातु नित्यं महांकुशा व
क्रे नित्यं महेशानी त्रिखंडा परिरक्षतु २६ आज्ञाचक्रे
सदा पातु बीजमुद्रा विषापहा सहस्रारे महामुद्रा
खेचरी पातु सर्वदा २७ नवचक्रे स्थिता मुद्रा हृदादि
पंचकेवतु योनिमुद्रा महामुद्रा सर्वत्र परिरक्षतु
२८ आधारादिमहाचक्रे त्रिपुरा पातु सर्वदा कामाक
कृप र्षणमुद्राख्या त्सदाकर्षणकर्मणि २९ बुद्ध्याकर्ष
सेवा णमुद्राख्या त्परबुद्धिविकर्षणे अहंकाराकर्षिणी
ख्या त्सर्वाहंकारकर्षिणी ३० शब्दाकर्षणरूपाख्या छ
ब्दाकर्षेतु सर्वदा स्पर्शाकर्षणरूपाख्या त्स्पर्शाकर्षण
कर्मणि रूपाकर्षणरूपाख्या त्सर्वरूपनिरूपणे र
साकर्षणरूपाख्या त्सदा सर्वरसेषु मे ३२ गंधाकर्ष

णीरूपापायात्सर्वरोगोपलब्धिषु चिन्ताकर्षिणीरूपापायान्मा
त्रि॰क॰ याद्याहृष्टकर्मणि ३३ धैर्याकर्षिणीरूपापायात्सर्वधैर्यवि
२ धौ सदा स्मृत्याकर्षिणीरूपापायात्सर्वत्रस्मृतिकर्मणि ३४
2 नामाकर्षिणीरूपापायान्नामव्याहरणे सदा वीजाकर्षिणी
रूपापायात्सर्ववीजप्रवोधने ३५ आत्माकर्षिणीरूपापायात्
सर्वात्माकर्षणे सदा अमृताकर्षिणीपायादमृताक
र्षणे सदा ३६ शरीराकर्षिणीपातु शरीराकर्षणे सदा
सर्वकार्येषु सर्वत्र पातु मां त्रिपुरेश्वरी ३७ अनंगकुसु
मा पातु पूर्वस्यां दिशि सर्वदा अनंगमेखला पातु द
क्षिणे कामरूपिणी ३८ पश्चिमे सर्वदा पायादनंगम
दनप्रिये उत्तरे पातु देवेशि ह्यनंगमदनातुरा अनं
गरेखा चाग्नेय्यां पातु नित्यं महेश्वरी नैरृत्यां पातु दे
वेशि सर्वदानंगरूपिणी अनंगांकुशा वायव्ये पातु
नित्यं सुखप्रदा अनंगमालिनी देवी ऐशान्यां पातु स
र्वदा चक्रस्था सर्वदा पातु देवी त्रिपुरसुंदरी क्षोभिणी
हृदये पातु शीर्षे विद्राविणी तथा ४२ आकर्षिणी
शिखा पातु कवचे ह्लादिनी तथा सर्वसंमोहिनी नेत्रे
सर्वगात्रेषु स्तंभिनी आकाशे जृंभिनी पातु पाताले तु
वशंकरी रंजिनी देवलोके वा उन्मादिनी वमृतले स
वीर्यमाथनी पाया भूतप्रेतालये सदा सिद्धानामाल

मालि

येपातु सर्वसंपत्तिरूपिणी राजमातंगसपत्नाणां सर्व
मंत्रमयीश्रिये अक्षराणांनिवासेतु सर्वदुःखक्षयंकरी
सर्वत्रसर्वदापातु देवीत्रिपुरवासिनी सर्वसिद्धिप्रदा
पातु देवीत्रिपुरवासिनी सर्वसिद्धिप्रदापातु सर्वसंखे
षुरक्षतु सर्वसंपत्प्रदादेवी पातुराजगृहेसदा स
र्वप्रियंकरीपातु सर्वलोकेषुसर्वदा सर्वदापातु
मोदेवी सर्वमंगलकारिणी सर्वकामप्रदादेवी
सर्ववांछासुरक्षतु ५७ ऐश्वर्येसर्वदापातु सर्वदुः
खविमोचिनी सर्वमृत्युप्रशमनी पायान्नित्यंयमाल
ये ५८ सर्वारंभेपातुदेवी सर्वविघ्नविनाशिनी सर्वा
गसुंदरीदेवी सर्वांगमभितोवतु स्नेहसौहार्दका
मेषु सर्वसौभाग्यदायिनी सर्वत्रसर्वदापातु त्रिपुरा
श्रीःशुभप्रदा सर्वज्ञाचगृहेपातु सर्वशक्तिमयीवने
५९ सर्वैश्वर्यप्रदामार्गे सर्वज्ञानमयीजले सर्वव्या
धिषुसर्वत्र सर्वव्याधिविनाशिनी ५१ सर्वदासर्वतःपा
तुसर्वाधारस्वरूपिणी सर्वपापहरादेवी सर्वमार्गे
षुरक्षतु ५२ सर्वानंदमयीदेवी नानासंकटगोचरे
सर्ववैरिभयेपातु सर्वरक्षास्वरूपिणी सर्वसंकल्पका
र्येषु सर्वकामफलप्रदा सर्वत्रसर्वदापातु देवीत्रिपुर
मालिनी ५४ वशिनीवशकार्येष्वा कामेश्वरीचस्तंभिनी

बक्ष्यकार्यं

त्रि॰ क॰
३

मोहिने मोदिनी पातु उच्चाटे विमलावतु मारणे वारुणी
पातु जपिनी जयकर्मणि सर्वेश्वरी सर्वकार्ये कौलिकी
भेदकर्मणि चक्रेश्वरी पातु नित्यं देवी सिद्धेश्वरी मम पा
शांकुशधनुर्बाणाः सर्वतः कामरूपिणः रक्षन्तु सततं म
दे सर्वत्रायुधदेवताः भगेशा भगवती पातु भगेरो भगसर्पेश्व
री चंडेश्वरी पातु दंडे दाने रुद्रात्मसंज्ञका कामेश्वरी रतौ
पातु युद्धे वज्रेश्वरी तथा ८७ भगमालिनी श्रीकामे
त्रिपुरांबिका सर्वत्र
कर्मेश्वरी शिवार्चने सर्वतन्त्रेश्वरी पातु सर्वमन्त्रप्रसाधने
योगीश्वरी स्नानकाले सर्वविद्येश्वरी प्रिये सर्ववीरेश्वरी
पाया दासने शयनादिके ८८ सर्ववागीश्वरी पातु सर्व
वागीशसंपदि सर्वविद्येश्वरी पातु सर्वविद्यासमन्वये
८९ सर्वसिद्धेश्वरी पातु सर्वसिद्धिप्रदायिनी सर्वकार्येषु
सर्वत्र पातु त्रिपुरसुंदरी ९० कामेश्वरी तथा पातु तिथौ
प्रतिपदाभिधे भगमालिनी द्वितीया यां देवी सर्वार्थसाधि
नी ९१ तृतीयायां पातु नित्या क्लिन्ना तु मदनातुरा चतुर्थ्यां
पातु भेरुंडा पंचम्यां वह्निवासिनी ९२ महाविद्येश्वरी ष
ष्ठ्यां सप्तम्यां शिवदूतिका अष्टम्यां त्वरिता पातु नवम्यां
कुलसुंदरी ९३ नित्या नित्या दशम्यां तु पायात् सकलसिद्धि
दा एकादश्यां नीलपताका द्वादश्यां विजया वतु ९४ त्र
योदश्यां तु देवेशि सर्वदा सर्वमंगला ज्वालामाला चतु

बिंदुचक्रेश्व
रीपातु सुंदरी
श्रीचार्चने

दृश्णे सुरिणिमायांतचिदृणिणी ६८ पंचदश्यां सदापातु
श्रीमत्त्रिपुरसुंदरी राजराजेश्वरीपातु सर्वकालेषुषो
डशी ६७ इतीदंकवचंदेविब्रह्मलेकेषुदुर्लभं तव
प्रीत्यामयाख्याते गोपनीयंस्वयोनिवत् ६८ तवनाम्नि
श्रुतेदेवि सर्वयज्ञफलंलभेत् सर्वपापंक्षयंयाति
वांछासर्वत्रसिद्ध्यति ६९ नाम्नांश्रुतगुणंस्तोत्रं व्या
ख्यानेचापितच्छतं तस्माच्छतगुणंध्यानं ध्यानाच्छत
गुणोमनुः ७० मंत्राच्छतगुणंदेवि कवचंमन्मुखोदि
ते शुचिःसमाहितोभूत्वा भक्तिश्रद्धासमन्वितः ७१
संस्थाप्यवामभागेतु शक्तिंस्वामिपरायणाम् रक्तव
स्त्रसमासीनो शिवमेत्रपरांशुभां याशक्तिःसामहा
देवी शिवरूपस्तुसाधकः अन्योन्यचिंतनाद्देवि हर
त्वमुपजायते ७३ शक्तियुक्तोयजेद्देवि श्रीचक्रेलद
णायने भोगैश्चमधुपर्कीद्यै स्तांबूलैश्चसुवासितैः
७४ ततस्तुकवचंदिव्यं पठेदेकमनाःप्रिये तस्मात्स्या
वीर्यसिद्धिःस्या नात्रकार्याविचारणा ७५ इदंरहस्य
परमं परंस्वस्त्ययनंमहत् यस्तुभक्त्यापठेद्देवि शृ
णुयाद्वासमाहितः ७६ ससर्वांल्लभतेकामा न्यदेवी
परंव्रजेत् सकृद्यस्तुपठेद्देविकवचंदेवदुर्लभं स
र्वयज्ञफलंतस्य भवत्येवनसंशयः संग्रामेषुजये।

त्रि·क
४
५

छन्नुन्मातंगानिव केसरी ७८ दहेत्तृणं यथा वह्निस्तथा
पापं जयेत्सदा न तस्य शास्त्रशस्त्राणि शरीरे प्रभवन्ति हि
न तस्य व्याधिः कदाचिन्न दुःखं नास्ति वरानने गतिस्तस्यैव
सर्वत्र वायोस्तुल्या सदा भवेत् ८० दीर्घायुः कामभोगेशो
धनधान्यसमृद्धिमान् जितव्याधी रूपवान्स्याद्गुणवानपि
जायते ८१ चतुर्वर्गः करे तस्य तिष्ठत्येव न संशयः सर्व
स्य वल्लभः सोपि पुत्रदारसमन्वितः इह लोके सुखी भू
त्वा परे मुक्तो भविष्यति न तस्य दुर्गतिर्देवि कदाचिदपि
जायते ८२ दुर्ग्रहाः सुग्रहा यान्ति वशं गच्छन्ति मानवाः
न तस्य विघ्नो भवति न शोको भुवि जायते वेतालाश्चापि
शाचाश्च राक्षसाः समयप्रदाः ते सर्वे विलयं यान्ति कव
चस्यास्य कीर्तनात् ८५ तत्र देशे न दुर्भिक्षं न च मारी प्र
जायते न च रोगाः प्रजायन्ते नोत्पाताः प्रभवन्ति च ८६
त्रिविधश्चैव योगिन्यस्तस्य रक्षणसन्निधौ शान्तिं चैव
प्रयच्छन्ति रक्षन्ति पुत्रवत्सदा ८७ शत्रवस्तस्य देवेशि
चिन्तनात्प्रलयं गताः विनश्यन्ति न संदेहो योगिन्यो भ
क्षयन्ति तान् ८८ शान्तिकादीनि कर्माणि मारणादीनि
यानि च वाक्यमात्रेण देवेशि तस्य सिध्यन्ति भूतले ८९
न पापैर्लिप्यते सोपि महारोगैरपि दारुणैः न कालस्य
वशं गच्छेन्न जरायां न दुःखितः ९० सर्वदा च सुखप्रा

त्रिः सर्वतीर्थफलंलभेत् नानेनसदृशःकश्चित्कवचो
भुविनायते ९१ देवासुरमनुष्याणां नवरूपसखावहं
येनविज्ञानमात्रेण स्मृतेनैवचसुंदरि ९२ अज्ञत्वयोलभ
तेकामान्मुक्तिमार्गंचगच्छति सर्वलक्षणहीनोपि स्म
रणात्कलुषापहः ९३ अहोकवचमाहात्म्यं पठमानस्य
नित्यशः विनापिलययोगेन योगसमताव्रजेत् ९४ भू
र्जेत्वचिसमालिख्य यंत्रंमंत्रविनिर्मितं मध्येत्रिकोणंसं
लेख्यसाध्यसाधकयोर्लिपिम् ९५ तद्बहिर्मूलमंत्राश्च मा
तृकाभिश्चवेष्टयेत् कालागुरुविमिश्रेण चंदनेनापि
सुंदरि ९६ एतद्यंत्रंमहेशानि सुरासुरसुदुर्लभम् गो
रोचनाकुंकुमाभ्यां तद्वासेकवचंलिखेत् ९७ श्वेतसूत्रे
णसंवेष्ट्यलाक्षयापरिवेष्टयेत् पंचामृतैःपंचगव्यैः स्ना
पयित्वाशुभेहनि ९८ संपूज्यदेवरूपांतां भूमिंदत्वा
चदक्षिणां प्राणप्रतिष्ठामंत्रेण प्राणांस्तत्रनिवेशयेत्
अंतर्योनिंततोध्यात्वा कंठलग्नांधनप्रदाम् शीर्षेव
श्यकरीदेविकर्माह्लंभनकारिणी १०० वक्षावामभु
जेदेविवैरिपक्षक्षयंकरी जठरेरोगशमनीपुत्रस्व
रूपदिमेस्थिता १०१ विद्याकरीललाटस्था शिखायांतुशु
भप्रदा सर्वकामप्रदादेवी सर्वरोगक्षयंकरी दक्षि
णोबाहुमूलेपि यदितिष्ठतिसर्वदा तदासर्वार्थसिद्धिः

त्रि·क ५ ८

स्या यद्यत्मनसिवर्तते १०३ एतस्यकवचस्यैव पठनंधारणं
प्रिये कथितंतवस्नेहा द्गोपनीयंसदाशुचि ४ गुरोःप्र
दप्रसादेन श्रीविद्यायदिलभ्यते तथैवकवचंदेवि त्रिषुलो
केषुदुर्लभम् सचदेवोहरःसाक्षात् त्पत्नीचपरमेश्वरी य
स्यभक्तिर्गुरौदेवि कर्तव्यादेववत्सदा १०६ तदामंत्रस्यतेत्र
स्य सिद्धिर्भवतिनान्यथा कवचस्यतथासिद्धि र्गुटिकाच
महेश्वरि ७ अज्ञात्वाकवचंदेवि श्रीविद्यांयोजपेत्प्रिये न
चाप्नोतिफलंतस्याः परेचनरकंव्रजेत् ८ सत्यंसत्यंपुनः
सत्यं सत्यंसत्यंपुनःपुनः नशक्नोमिप्रभावेहि कथितंक
वचस्यतु ९ जिह्वाकोटिशतैर्देवि वक्त्रकोटिशतैरपि पं
चास्येनकथंदेवि वर्णितुंशक्यतेमया ११० यस्मैकस्मैनदा
तव्यं सुगोप्यमतिदुर्लभं नदेयंपरशिष्याय कृपणायम
हेश्वरि १११ गुरुभक्तिविहीनाय परहिंसारतायच निंदका
यकुचैलाय दांभिकायमहेश्वरि ११२ योददातिनिषिद्धेभ्यः
कवचंमन्मुखोदितम् तस्यनश्यंतिदेवेशि विद्यायुःकीर्ति
संपदः ११३ तेहिंसंतिसदादेवि योगिन्योमातृमंडलात्
परेनरकमाप्नोति जन्मकोटिशतानिच ११४ देयंशिष्याय
शांतायगुरुभक्तिरतायच सर्वलक्षणयुक्ताय यंत्रमंत्रय
तायच ११५ इतिश्रीवामकेश्वरतंत्रेश्रीमहाज्ञानराजेश्व
र्योःश्रीमहात्रिपुरसुंदर्याःकवचंसमाप्तम् ॥

स. १

ॐ श्रीगणेशाय नमः श्रीगुरवे शिवायो नमः
श्रीदेव्यै नमः श्रीदेव्युवाच देवदेव महादेव
भक्तानां प्रीतिवर्धन शाकाराद्यं नामसाहस्रं
मे वद महेश्वर श्रीभैरव उवाच शृणुष्व भा
वाद्धि श्रीदेवि ग्रहिलासि स्वके ग्रहे तथापि
कथयाम्येव तव स्नेहाद्धि शोभनः यस्यैकाक्ष
रमात्रेण पठितेन महेश्वरि साधको देव
देवेश वन्दनीयो भवेत्प्रिये अस्य स्तोत्रस्य दे
वेशि ऋषिः शंकर ईरितः महामाया महादे
वी श्रीविद्या देवतेरिता लक्ष्मीवाग्भव मत्रे
शिवा बीजं सुन्दरि ईरितम् कामराजश्च शक्ति
श्च शक्तिश्चैव तत्र कीलकम् धर्मार्थकाममो
क्षार्थे विनियोग इति स्मृतः अस्य श्रीशाकारा
द्यस्तोत्रमंत्रपाठस्य शंकर ऋषिः श्रीविद्या
देवता लक्ष्मीवाग्भवं बीजं कामराजः शक्तिः
शक्तिः कीलकं धर्मार्थकाममोक्षार्थे पाठे
विनियोगः ॥ अथ ध्यानं ॥ सूर्यकोटिसमाना
भां चन्द्रबिम्बां त्रिलोचनाम् पाशांकुशधनु
र्बीणां न्धारयंतीं शिवां भजे ॥ इति ध्यानं ॥ श्री
विद्या श्रीप्रदा श्रीदवन्दिता श्रीपरप्रिया श्री

सेव्याश्रीपतिश्चब्रह्मादेवदानववंदिता श्रीरूपा
श्रीवत्सयरपूजिताश्रीप्रदायिनी श्रीकरीश्री
कराचश्रीपूजिताश्रीनमस्कृता श्रीनामधे
याश्रीमात्रामृतानन्दवतीश्रद्धा श्रद्धावतीश्र
द्धायुक्ताश्रद्धालभ्याश्रद्धाकरा श्रद्धायुक्तमनः
श्रद्धाकारिणीश्रीमदानना श्रीमतीश्रीयुक्ता
चश्रीपूजनार्पितपद्मगा श्रीबीजत्रययुक्ता
चश्रीबीजत्रयवासिनी श्रीबीजलभ्याश्रीस्था
नाश्रीबीजानन्दवर्धिनी श्रीकर्त्रीश्रीयात्राश्रीम
ताश्रीकृतास्पदा श्रीपात्रनिरताश्रीपात्रकरू।
णितलोचना श्रीपात्रलभ्याश्रीपात्राश्रीपात्रा
मोदकारिणी श्रीपात्रकारिणीश्रीपात्रेश्वरी
श्रीप्रपूजिता श्रीचक्रनिरताचश्रीचक्रराजकृ
तास्पदा श्रीचक्रवन्दमानाचश्रीचक्रानन्दका
रिणी श्रीचक्रपूज्याश्रीचक्ररूपिणीश्रीयरान्वि
ता श्रीचक्रबिंदुरूपाचश्रीचक्रकोणवासिनी
श्रीचक्रग्रंथिस्थानाचश्रीचक्राप्रियावादिनी
श्रीचक्रपूजिताचश्रीचक्रदर्शनपापहा श्रीच
क्रकायरक्ताचश्रीचक्रनादतोषिता श्रीचक्रवा
सिनीचश्रीचक्रचंपाश्रुभाकरा श्रीचक्रभृगट

हेलयाश्रीचक्रवृत्तवासिनी श्रीचक्रसंस्थाश्रीच
स· क्रषोडशदलवासिनी श्रीचक्राष्टदलस्थाचश्री
२ चक्रार्पितमानसा श्रीचक्रमान्याश्रीचक्रज्ञान
2 निर्भरमानसा श्रीचक्रजाश्रीचक्रचतुर्दश
योनिवासिनी श्रीचक्रदशकोणस्थाश्रीचक्रको
णवासिनी श्रीचक्रवसुकोणस्थाश्रीचक्रत्र्यस्र
वासिनी श्रीसर्वसंक्षोभिणीमुद्रारूपिणीसुखदा
यिनी श्रीसर्वद्राविणीमुद्रारूपातिशयरूपिणी
श्रीसर्वाकर्षिणीरूपाश्रीसर्ववशकारिणी श्रीस
र्वोन्मादिनीरूपाश्रीमहाङ्कुशारूपिणी श्रीखेच
रीमहामुद्राश्रीसर्वबीजकारिणी श्रीयोनिरू
पाश्रीकाराश्रीसाधकवरप्रदा क्षान्तिरूपाक्षान्ति
पराक्षान्तिकुंडलधारिणी क्षान्तिस्तुताक्षान्तिपू
ज्याक्षान्तिस्थाक्षान्तिकारिणी क्षान्तिगम्याक्षान्तिल
भ्याक्षान्तिःशास्त्रविवर्धिनी शास्त्रगेयाशास्त्रस
भ्याशास्त्रस्थाशास्त्रकारिणी शास्त्रमान्याशा
स्त्रनिधिःशास्त्रमाल्यानुरोधिनी शास्त्रपूजन
लिष्टाचशास्त्रनिन्दकनर्तिनी शास्त्रस्तुतिप
राशास्त्रगेयाशास्त्रानुवर्तिनी श्रेयस्करीश्रूय
माणसर्वोत्तमगुणाशिवा शिवरूपाशिवा

कारा शिवस्था शिवपूजिता शिवस्तुता शि
वाराध्या शिवपद्मासनस्थिता शिवदा शिव
माता च शिवजाया शिवप्रिया शिवप्रसादक
र्त्री च शिवादिसुरपूजिता शिवनेत्रा शिवहस्ता
शिवजिह्वा शिवाकरा शिवोदरी शिवोरस्का
शिवैश्वर्यप्रदायिनी शिववश्या शिवावेश्या
शिवपा शिववर्धिनी शिवगीः शिवनामा च शि
वकर्मप्रवर्त्तिका शिवकर्मरता शैवी शिवक
र्मफलप्रदा शिवकर्मार्चनतुष्टा शिवकर्मानु
वर्त्तिनी शिवकर्मप्रिया चैव शिवकर्मकृता
स्पदा शिवकर्मनुता चैव शिवहृती शिवांकगा
शिवांकवसुमाना च शिववामांगवासिनी शि
वांकासनसंस्था च शिवांकमध्यवासिनी शांभ
वी शाक्रपूज्या च शाक्रोद्यानकृतास्पदा शाक्रोपान
लता रूपा शाक्रोपानफलार्थिनी शाक्रगेहकृत
स्थाना शारिकारूपधारिणी शारिकाभाषिणी चे
व शारिकाचलवासिनी शंभुस्तुता शंभुमाता शं
भुध्यानपरायणा शंभुप्रसादकर्त्री च शंभुदेवी च
शंभुया शंभुपूज्या शंभुपरा शंभ्वादिदेववन्दिता
श्यामा श्यामकचा श्यामभूषणा श्यामप्रथिणी

स॰ १
3

श्यामवह्ना श्यामनेत्रा श्यामास्ह्ना च शवस्थिता
शवकपालयज्ञी च शवासनकृतास्पदा श्या
मभूः श्यामतिलका श्यामगेडा श्मेश्वरी श्या
मसुखी श्यामकुचा श्यामोदरस्थशोभिनी श्या
मकांचीधरा श्यामस्रगास्या शवहर्षिणी श
वनेत्रा शवमध्या शवक्रीडारता शिवा शैव
रूपधरा शैवशक्तिः शैवपरायणा शैवशक्ति
स्थिता शैवधारिणी शैववल्लभा शैवपूज्या शै
वसुखी शैवध्यानपरायणा शैवमार्गस्थिता
शैवसुखनागप्रपूजिता शक्तिः शक्तिधरा श
क्तिबीजद्वयसुभूषिता शक्तिलभ्या शक्तिबी
जधरा शक्तिप्रपूजिता शक्तिरूपधरा शक्ति
रूपजितवसुंधरा शक्तिशक्तिः शक्तिसुखमो
हितत्रिजगद्धरा शक्तिपत्री शक्तिपुत्री शक्ति
माता च शक्तिसूः शर्वाणी शर्वशक्तिश्च शर्वमा
ता च शर्वेहा शर्वकरा शर्वहरा शर्वाकारा च
शर्वदा शर्वसज्पा शर्वजाया शर्वमाया च श।
वेसूः शर्वनेत्रा शर्वकूटा शर्वचन्दनलेपना
शर्वमूला शर्वबीजा शर्वभद्रविवर्धिनी शर्व
रूपा शर्वभूषा शर्वालंकारधारिणी शर्वबा

मस्थिता शार्वानन्ददा शार्वकौतिता शार्वदे
वी शार्वराज्ञी शार्वकामानुवर्तिनी शार्वभ
द्या शार्वपात्रा शार्वकार्यप्रवर्तिनी शंखिनी
शंखहस्ता च शंखमालाविभूषणा शंखह
स्ता शंखनादमोदिनी शंखवल्लभा शंखकुं
डलभूषाढ्या शंखकुंडलभूषिता शंखपात्रा
शंखकरणी शंखांता शंखवासिनी शंखधीरा
शंखधारा शंखनादप्रहर्षिता शाह्स्थिता शा
ह्माना शाह्वानन्दप्रवर्धिनी शाह्श्रोता शाह्
करयथेष्टफलदायिनी शाह्रूपा शाह्हरा
शाह्करा च शाह्दा शुक्रिणी शुक्रपूज्या च शु
क्रानिंदकानिंदका शुक्रात्मिका शुक्रकरा शुक्र
स्था शुक्रवर्धिनी शुक्रतर्पणतृप्ता च शुक्रतर्प
णलालिता शुक्राढ्या शुक्रमध्यस्था शुक्रपूज
नतोषिता शुक्राह्लारा शुक्रपरा शुक्रभक्तकव
र्धिनी शुक्रभक्तकसवीर्यदायिनी शुक्रवल्ल
भा शुक्राढ्ती शुक्रमता च शुक्रकारणवर्धिनी
शुक्रदत्तसुरा शापनाशिनी शुक्रकामिनी शु
क्रनामा शुक्रमाता शुक्रौघमदधारिणी शान्ता
नन्दकृतार्चा च शान्तानंदप्रवर्तिनी शान्तानन्द

स॰ ५

५

स्थिताचैवश्मशानानन्दकृतास्पदा श्मशानस्थाश्म
शानचराश्मशानावासहर्षिता श्मशानभस्म
भूषाचश्मशानभस्मभोजिनी श्मशानवास
निरताश्मशानपाकवर्धिनी श्मशानकाश्म
शानाचश्मशानगंधतोषिता श्मशानमांसभ
क्ष्याचश्मशानग्रामवर्धिनी श्मशानग्रामसंहृ
ष्टाश्मशानरसहारिणी श्मशानरसल्माच
श्मशानरसवर्धिनी श्मशानासवमत्ताचश्म
शानवरवर्णिनी श्मशानमध्यनिलयाश्म
शानान्तरचारिणी श्मशानान्तरवाह्याचश्मशा
नान्तरनर्तकी श्मशानगर्भाश्मशानमदघू
र्णितलोचना श्मशानपूज्याश्मशानकार्यका
रणतत्परा श्मशानपूजानिरताश्मशानपूज
नप्रिया श्मशानपूजनारंभकर्त्रीश्मशानव
ल्लभा श्मशानपूजकाचैवश्मशानपूजाफ
लप्रदा श्मशानपूजासिद्धिस्थाश्मशानसुंदरी
शादा श्मशानान्तरमत्ताचश्मशानान्तरमोदि
नी श्मशानान्तरलभ्याचश्मशानान्तरमोदिता
श्मशानान्तरकाम्याचश्मशानान्तरकार्यदा
श्मशानपंचमन्त्राश्मशानपंचमप्रिया श्म

शान पंचमाद्मी च श्मशान पंचमार्पिता श्म
शाना नरब्रह्मा च श्मशाना नरतर्पिणी श्मशा
नाना रत्नार्थी च श्मशानानरशोभिता श्मशान
भूमिनिलया श्मशानभूमिवासिनी श्मशान
भूमिकर्त्री च श्मशानभूमिनाशिका श्मशा
नभूमिरूपा च श्मशानभूमिकाप्रिया श्मशा
नजलात्मा च श्मशानजलवासिनी श्मशा
नजलशोभा च श्मशानजलशोभिनी श्मशा
नजलसेवनी श्मशानजलमध्यगा श्मशान
जलरूपा च श्मशानजलमोदिता श्मशान
जलपूज्या च श्मशानजलपूजका श्मशा
नजलमग्ना च श्मशानजलवर्धिनी श्मशा
नजललग्ना च श्मशानजलदप्रिया श्मशा
नजलदच्छाया श्मशानजलदस्थिता श्म।
शानजलदाकारा श्मशानजनदायिका
श्मशानजलदक्षीता श्मशानजलदाश्रिता
श्मशानजलदसेव्या श्मशानजलदार्चिता
श्मशानदहनाचैव श्मशानदहनाप्रिया श्म
शानानलमाना च श्मशानदहनाप्रिया श्म
शानदहनारूढा श्मशानदहनास्पदा श्म

स. ५

शानदहनज्वालाबद्धकेशी श्मशानगा श्म
शानदहनमध्या च श्मशानदहनप्रभा श्मशा
नदहनपूज्या श्मशानदहनस्थिता श्मशा
नदहनाकारा श्मशानदहनार्चिता श्मशा
नदहनघोरा श्मशानदहनोद्भवा श्मशान
दहनाग्नी च श्मशानदहनाकरा श्मशानद
हनज्योतिः श्मशानदहप्रया श्मशानवा
युरूपा च श्मशानवायुकारका श्मशानवा
युमध्यस्था श्मशानवायुनाशिनी श्मशान
वायुदेवी च श्मशानवायुपृष्ठगा श्मशानवा
युपूज्या च श्मशानवायुपृष्ठगा श्मशानवा
युनिलया श्मशानवायुकामिनी श्मशान
वायुनग्नांगी श्मशानवायुभामिनी श्मशा
नवायुकार्या च श्मशानवायुतारिणी श्मशा
नवायुघोरा च श्मशानवायुमारिणी श्मशा
नवायुसौम्या च श्मशानवायुतापिनी श्मशा
नवायुमध्यस्था श्मशानवायुव्यापिनी श्मशा
नवस्त्रवसना श्मशानवस्त्रशोभिना श्मशा
नवस्त्रदात्री च श्मशानवस्त्रसुदरा श्मशा
नवस्त्रयात्री च श्मशानवस्त्रमार्जिका श्मशा

नवस्त्रहा चैव श्मशानवस्त्रधारिणी श्मशान
वस्त्रचौरी च श्मशानवस्त्रदायिनी श्मशानव
स्त्रहा मा च श्मशानवस्त्रोत्तरीयका श्मशान
पुष्पा श्मशानपुष्पिणी श्मशानबीजका श्म
शानपुष्पमालाढ्या श्मशानपुष्पमालिनी श्म
शानपुष्पशोभाढ्या श्मशानपुष्पबीजका
श्मशानपुष्पकन्दर्पा श्मशानपुष्पवती सदा
श्मशानपुष्पकर्त्री च श्मशानपुष्पहारिणी
श्मशानपुष्पस्रजनीया श्मशानपुष्पप्रहर्षिता
श्मशानपुष्पमदाप्ता श्मशानपुष्पप्रियंकरा
श्मशानहस्तकर्त्री च श्मशानहस्तवर्धिनी श्म
शानहस्तमातापे श्मशानहस्तहर्षिता श्मशा
नहस्तयाना च श्मशानहस्तवासिनी श्मशान
हस्तफलस्था श्मशानहस्तकारिणी श्मशान
हस्तहर्षा च श्मशानहस्तवर्धिनी श्मशानह
स्तजा चैव श्मशानहस्तहेदगा श्मशानहस्तशा
खा च श्मशानहस्तप्रहर्षिता श्मशानहस्तमू
लस्था श्मशानहस्ताग्रवासिनी श्मशानहस्तप
र्णस्था श्मशानहस्तपुष्पगा श्मशानहस्तफल
स्था श्मशानहस्तबीजगा श्मशानमाथना चैव

स० श्मशानसाधनप्रिया श्मशानसाधनीयाच श्म
८ शानसाधनार्पिता श्मशानसाधनारक्ता श्मशा
6 नसाधनार्थदा श्मशानसाधनज्येष्ठा श्मशान
साधनप्रिया श्मशानसाधनक्रीता श्मशानसा
धनकृता श्मशानसाधनश्रेष्ठा श्मशानसाध
नार्तिहृत् श्मशानसाधनकरी श्मशानसाधना
र्चिता श्मशानसाधनकरा श्मशानसाधनास्थिता
श्मशानसाधकाराध्या श्मशानसाधकार्चिता श्म
शानसाधकपूज्या श्मशानसाधकार्पिणी श्मशा
नसाधकस्तुत्या श्मशानसाधकप्रिया श्मशान
साधकमाता श्मशानसाधकार्तिहृत् श्मशान
साधकाकारा श्मशानसाधकासदा श्मशानसा
धकहृद्या श्मशानसाधकेश्वरी श्मशानसाधक
पदपूजाफलविवर्धिनी श्मशानेष्टाकराचैव
श्मशानेष्टाप्रवर्तिनी श्मशानेष्टाप्रियाचैव
श्मशानेष्टाप्रियंकरी श्मशानेष्टासदायुक्ता
श्मशानेष्टामुदान्विता शैलजाशैलमाताचशै
लेशीशैलसुंदरी शैलपुत्रीशैलकर्त्रीशैलदा
शैलवर्जिता शैलस्थाशैलकूटस्थाशैलकूट
प्रवर्तिनी शैलकूटचराचैवशैलकूटकृतार्चना

शैलकूटसमुद्रायुक्ता शैलकूटातुलाक्षिनी शैलकू
टकृतनपाः शैलकूटकृतस्थितिः शैलकूटकृ
तनर्चा शैलकूटांगनस्थिता शैलमालाचराचे
व शैलमालाक्षिनी शैलपुष्पकृतमालाधारिणी
शैलवासिनी शैलभगिनी शैलाकी शैलमाया
तुलालिता शैलजपालनकरा शैलवर्गांतुरी
थिनी शैलवर्गस्तुता शैलवर्गसेव्याच शैलहा
शैलवर्गकृतनर्चा शैलवर्गमहेश्वरी शैलव
र्गमहेश्वरपुत्री शैलदिवन्दिता शैलरूपा शै
लकरा शैलपात्राच शैलपा शैलपाषाणवं
द्याच शैलपाषाणरूपिणी शैलवासा शैल
गर्वा शैलधात्रीच शैलरूः शैलाब्रभोजिनी शै
लरत्नाकरणसस्पृहा शीधुप्रिया शीधुगर्वा शी
धुवानपरायणा शीधुपानरता शीधुधारिणी
शीधुरूपिणी शीधुमार्गरता शीधुपायपत्री
च शीधुमा शीधुहत्या शीधुमदाघूर्णितलोच
नत्रया शीधुपात्रकरा शीधुनादिणी शीधुव
त्सला शीधुपानसंतुलिनी शीधुतृप्ता शीधुपान
कपालिनी शीधामोदप्रिया शीधामोदतोषित
मानसा शीधामोदकृतस्थाना शीधामोदबलि

स
८

प्रिया श्रीगुरुपूजकपूज्या च श्रीगुरुनिंदकघातिनी
श्रीगुरुनिंदकभक्ष्या च श्रीगुरुनिंदकतर्जनी श्रीगु
निन्दकशत्रुघ्ना श्रीगुरुनिंदकमारिणी श्रीगुरुका
रकमित्रा च श्रीगुरुकारकपालिनी श्रीगुरुकरी
श्रीगुरुकरा श्रीगुरुकार्यप्रवर्तिनी श्रीगुरुकारक
सेव्या च श्रीगुरुकारकतोषिता शार्वरी शार्वरी
पालकलाराजितमस्तका शार्वरी कृष्णरूपा
च शार्वरी कृष्णरूपिणी शार्वरी शुक्लरूपा च शा
र्वरी शुक्लरूपदा शार्वरी पूजनासक्ता शार्वरी
पूजनप्रिया शार्वरी पूजनारंभा शार्वरी पूजनों
किता शार्वरी पूर्वजन्या च शार्वरी पूर्ववासिनी
शार्वरी मध्यरूपस्था शार्वरी मध्यवर्तिनी शार्वरी
मुखसंस्था च शार्वरी मुखमध्यगा शार्वरी शोभरू
पा च शार्वरी शोभसिद्धिदा शार्वरी शोभमान्या च
शार्वरी शोभपूजिता शार्वरी शोभजया च शार्वरी
शोभमानिता शार्वरी शोभमान्या च शार्वरी शोभ
वासिनी शार्वरी शोभोज्ञानपरमाथकसिद्धिदा
यिनी शार्वरी शोभवेद्या च शार्वरी शोभवर्धिनी
शार्वरी शोभरूपेशी शार्वरी शोभनायका शार्व
री शोभश्रेष्ठा च शार्वरी शोभसामगा शार्मप्र

दाचधर्मैधीधर्मैयर्मकृतार्चना धर्मस्थाध
र्मदाधर्मकारकसुरपूजिता सूक्ष्मस्थितासू
क्ष्मपूज्यासूक्ष्मासूक्ष्मसुखीतथा सूक्ष्मसुखोसू
क्ष्मतेजःसूक्ष्मज्वालावभासिनी सूक्ष्मकर्त्रीसू
क्ष्मधरासूक्ष्मरूपानुवर्तिनी शिवाशिवाशि
वाचैवशिवावेशमनोरमा शिवास्थाचशि
वोक्ताचशिवारूपसंस्कृता शिवाधत्रीशि
वाधाराशिवावतीशिवाप्रसूः शिवाधात्री
शिवामानाशिवाग्ररूपधारिणी शमनाश
मनप्रीताशमनप्रीतिवर्धिनी शमनेशीश
मनगाशमनार्चितपादुका शमनेशाशम
नैड्याशमनीशमनस्वसा शमनैश्वर्यदाचैव
शमनैश्वर्यनाशिनी शमनार्चितपादाब्जा।
शमनार्चाफलप्रदा शमनानन्दधात्रीचश
मनानन्दवर्धिनी शनिरूपाशनिगेयाशनि
माताशनिस्वसा शनिधात्रीशनिस्थानाश
निदेवप्रपूजिता शनिप्रश्वसनाश्वसनप्रीता
श्वसनस्थाश्वसनगा श्वसनेशीश्वसनार्चाप
राश्वसनवर्धिनी श्वसनप्राणरूपाचश्वसन
प्राणधारिणी श्वसनप्राणवेद्याचश्वसनप्रा

स॰
प
8

णवल्लभा श्वसनव्यानरूपा च श्वसनव्यानमार्ग
गा श्वसनव्यानयंत्री च श्वसनव्यानधारिणी श्व
सनसमानवेगा श्वसनसमानस्थिता श्वसन
समानरूपा श्वसनसमानार्चिता श्वसनोदान
व्याप्या च श्वसनोद्यानव्यापिता श्वसनापानस्था
नस्था श्वसनापानव्यापिका श्वसननागकूर्मा
दिदशा श्वसनपूजिता श्वसनस्थानसंस्था च
श्वसनी श्वसनेश्वरी शरीरस्था शरीरांका श
रीरत्रयभूषिता शरीरस्थितिशुक्ला च शरीर
स्थितिवर्धिनी शरीरेशी शरीरांका शरीरार्च
नतोषिता शरीरब्रह्मरंध्रस्था शरीरब्रह्मरं
ध्रगा शरीरब्रह्मरंध्रेशी शरीरब्रह्मरंध्रजा श
रीरललाटरूपा शरीरभ्रूविलासिनी शरीर
नेत्ररूपा च शरीरनेत्रपालिनी शरीरकर्ण
संस्था च शरीरगंडवासिनी शरीरनासारूप
स्था शरीरमुखवासिनी शरीरजिह्वारूपस्था
शरीरोष्ठनिवासिनी शरीरदन्तवासा च शरीर
चिबुकप्रिया शरीरकंठवसना शरीरोरःनि
वासिनी शरीरभुजवासा च शरीरहस्तवासि
नी शरीरस्तनरूपा च शरीरनाभिरूपिणी श

रीरयोनिरूपाचशारीरलिंगरूपिणी शारीरजानु
रूपस्थाशारीरजंघारूपिणी शारीरपादरूपस्थाश
रीरांतरवासिनी शारीरमूलाधारास्थाशारीरस्वा
धिष्ठानगा शारीरमणिपूरस्थाशारीरानाहतस्थि
ता शारीरविशुद्धवासाशारीराज्ञाचक्रस्थिता शा
रीरहृत्कंजवासाशारीरहृत्कंजस्थिता शारीरप्रा
णसंस्थाचशारीरप्राणवाहिनी शारीरेडास्वरूप
स्थाशारीरपिंगलाश्रिता शारीरसुषुम्नावासाशा
रीरनाडीसंस्थिता शारीरकुंडलिनीरूपाशारीर
कुंडलिनीश्रिता शारीरशुद्धिकर्त्रीचशारीरशुद्धि
कारिणी शारीरयौवनसंलग्नाशारीरयौवनकारिणी
शारीरयौवनविस्फूर्ताशारीरयौवनशोभिनी शारी
रपद्मासनस्थाशारीरपद्मासनस्थिता शारीरसि
द्धासनगाशारीरसिद्धासनचिंता शारीरधौतीक
र्मस्थाशारीरधौतीविधायिनी शारीरवस्तीविज्ञा
नाशारीरवस्तीविधायिनी शारीरनेतीविक्षेपी
शारीरनेतीसुभाविता शारीरत्रोटककराशारी
रत्रोटकार्चिता शारीरत्रोटकस्थानाशारीरत्रोट
कल्पना शारीरनौलिकस्नाताशारीरनौलिकार्त्रि
ता शारीरनौलिकारंभाशारीरनौलिकार्थदा शा

म० ५ १

रीरकपालभातीकर्मस्थितिविशारदा शरीरसूर्य
भेदनस्था शरीरसूर्यभेदनगा शरीरोज्जयकुंभक
कारिणी श्लेष्महारिणी शीत्कारकर्मनिरता शी
त्कारकर्मतारिणी शरीरशीतलीकर्मकारिणी
शीतलाप्रिया शरीरभस्त्रिकामेस्था शरीरभ्रामरी
रता शरीरमूर्छाकर्मस्था शरीरसंहितस्थिता श
रीरमहामुद्रस्था शरीरमहामुद्रगा शरीरमहा
बंधस्था शरीरमहाबंधहा शीघ्रगा च शीघ्रगतिः
शीघ्रगतिप्रहर्षिता शीघ्रस्था चैव शीघ्रेशी शी
घ्रगामिवरप्रदा शेवधिः शेवधिरूपा शेवाथ
प्रक्रमूर्धजा शेवधिकृतधामस्था शेवधिरहरा
जिता शेवधिसोपानप्रक्रमरहवामप्रहर्षिता
शिष्यरूपा शिष्यमयी शिष्यवरप्रहर्षिता
शीच शिष्येशानी शिष्यनायकनायका शिष्ये
गस्थिता शिष्यमेरुजपपरप्रदा शिष्यमाता शि
ष्यगतिः शिष्यमानप्रदायिनी शिष्यपूजापरा
शिष्यपूजाफलविवयिनी शिष्येश्वरी शिष्यप्र
का शिष्यप्रक्रगुरुस्तुता शास्ता च शास्त्ररूपा च
शास्त्ररूपमनोहरा शास्त्रहस्ता शास्त्रपदा शास्त्र
नायकनायका शंकासिंहस्तनाशंकासिंहदे

वनमस्कृता श्रीं ह्रीं माता श्रीं ह्रीं गेया श्रीं ह्रीं दा
ता च श्रीं ह्रीं हृः श्रीं ह्रीं प्रभा च श्रीं ह्रीं श्री श्रीं ह्रीं देव
नमस्कृता श्रीं ह्रीं स्था श्रीं ह्रीं देवेशी श्रीं ह्रीं देववर
प्रदा श्रीं ह्रीं पूज्या श्रीं ह्रीं मयी श्रीं ह्रीं पूजाफलप्रदा
शरहस्ता शरतूणा शरधिभूषणाम्बरा शरपं
चपूजिता शरपंचकृत्यविधायिनी शरेष्टा शर
पुंखस्था शराग्रविहितास्थितिः शरेशी च शरे
ण्या च शरमार्गविशारदा शरमार्गहनशत्रुः
शरमार्गविसर्पिणी शंबरारिपूज्यपदा शंब
रारिसुपूजिता शंबरारिबीजयुक्ता शंबरा
रिसुकूटिना शिवगा शिवगेया च शिवस्था च
शिवेश्वरी शिवभूः शिवमान्या च शिवजाया शि
वोकगा शिवपूज्या शिवाराध्या शिवा शिवप्र
दायिनी शिवाश्रिता शिवमध्या शिववामांगवा
सिनी शिवस्थाना शिवस्थानस्थिता शिवसम
र्चिता शिववश्या शिवावेश्या शिवाकारा शिवो
त्सदा शिववाहस्थिता चैव शिववाहसुशो
भिता शिवेड्या शिवजेपष्टा च शिवसंपूज्यपादु
का शांता शांतस्वरूपा च शांतलोकप्रियंकरी
शांतजलस्वरूपा च शांतस्थलविभाविनी

स० १

10

शांतवायुस्थिता शांताकाशचारणचारिणी शां
तेपृथ्वी शांतजलदा शांतकर्मविवेकिनी शांतपू
ज्या शांतमात्या शांतजननिवासिनी शांतेपृथ्वी शां
तवसना शांतकान्तेश्वरांबरा शांतकांता शांत
माता शांतपूजनहर्षिता शांतिकलशावासा
व शांतिकलशवासिनी शांतात्मा शांतवीर्या च
शांतस्थितिविहारिणी शांतिकर्मरता शांति
कर्मकरणसस्पृहा शांतपद्मनिवासा च शांत
प्रकाशरूपिणी शांतप्रकाशरूपा च शांतप्र
काशवर्धिनी शांतगुरुस्वरूपा च शांतशिष्यस्व
रूपिणी शांतनेत्रा शांतकर्णा शांतनासा च शां
तदा शांतत्वक् शांतजिह्वा च शांतभूतसमुच्च
या शांतस्तना शांतपाल्या शांतपालकपालिनी
शांतहस्ता शांतपदा शांतेश्वरसमर्चिता शां
तस्थाननिवासा च शांतस्त्रीः शांतवासना शां
तात्मा शांतमदा च शांताहंकाररूपिणी शांत
मोहा शांतमाया शांतरागानुमोदिनी शांत
हरी शांतवरा शांतलोकप्रपालिनी शांत
पा शुद्धिगतिः शुद्धिमार्गनिरोपिनी शुद्धिरू
री शुद्धिरता शुद्धा शुद्धपथास्थिता शुद्धेश्व
शुद्धपथ्य

निषेव्या च शुद्धपथविमानगा शुद्धाध्वयुक्ता
शुद्धाध्ववासिनी शुद्धिमत्का शुद्धियुक्ता शु
द्धिपरा शुद्धिरूपानुमोदिनी शुद्धितुष्टा शुद्धि
तुष्टा शुद्धिविद्यासमर्चिता शुद्धविद्याप्रभा चै
व शुद्धविद्याप्रदायिनी शुनासीरस्तुता चैव शु
नासीरसमर्चिता शुनासीरसमाराध्या शुनासी
रबलिप्रदा शुनासीरेष्टदा चैव शुनासीरजय
प्रदा शुनासीरार्थदा चैव शुनासीरसुकामदा
शुनासीरधर्मदा च शुनासीरसुमोक्षदा शचीश
पुत्रदा चैव शचीश्वरवरप्रदा शचीरूपा शचीपू
ज्या शचीधामा शचीस्तुता शशिप्रभा शशिमुखी
शशिमुख्येनमस्कृता शशितुल्या शशिस्या च
शशिलक्षणनाशिनी शशिप्रभाप्रिया चैव श
शिप्रभाविभाविनी शशिमता शशिपुन्मादा श
शिलोकनिभानना शशिदीप्तिनिभा चैव शशि
कोटिसमुज्ज्वला शृंगारी शृंगाररससंप्रीता शृं
गारवल्लभा शृंगारेशी च शृंगाररससंप्रीतमा
नसा शृंगारस्या शृंगारजा शृंगारादिरसप्लुता
शृंगाररसवीरस्या शृंगारांगमनोरमा शृंगारगी
तनिरता शृंगारवायतोषिता शृंगारशुभवक्त्री

स॰ ११ चशृंगारी चैव शंकरी शंकरस्या शंकरे श्री शं
करप्रियवादिनी शंकराग्रेस्थिता चैव शंकरपु
रनःस्थिता शंकरमुखवामा च शंकरप्रियबांध
वा शंकरेष्टप्रदा चैव शंकरेष्टप्रदायिनी शंक
रस्याननिरता शंकरशत्रुलोकहा शंकरशुभ
यात्री च शंकराशुभनाशिनी शंकरांगस्थिता च
श्रीशंकरी शंकरप्रिया ११८ इतीदं स्तवसर्वस्व
श्रीविद्यायामयेरितम् अप्रकाश्यमदातव्यम
वक्तव्यं महेश्वरि स्तवानामुत्तमं चैतज्जपाना
मुत्तमं स्मृतम् येन पठितमात्रेण श्रीश्रीविद्या
प्रसीदति इदं गुह्यतमं देवि परमं संप्रकीर्तित
म् इदमेव महादेवि पठनीयं प्रयत्नतः एत
त्पठनमात्रेण सर्वे नश्यन्ति पार्वति भूताः प्रेताः
पिशाचाश्च राक्षसाश्च सरीसृपाः महामारीभ
यं देवि अकालमृत्युजं तथा भयं नश्यन्ति देवेशि
देशराजभयं तथा यांकांचित्कामनां देवि वांछ
ति मनसा शिवे तां तां सर्वामवाप्नोति नात्रका
र्या विचारणा एतदेव परं ध्यानमेतदेव परो ज
पः एतदेव परं ज्योतिरेतदेव परं पदम् न दा
तव्यं शठस्यापि दांभिकस्य कुलेश्वरि अभक्ताय

स्वपुत्राय दत्वा नरकमाप्नुयात् गोप्यंयेनदेवेशि
साम्येन स्वरेण सा महाचीनक्रमस्य स्वाविलिखे
द्भूर्जे मन्त्रके मूर्ध्नि भाले बाहौ च धारयेत्परमेश्वरि
धारणात्परमेशानि सिद्धिर्भवति वाञ्छिता आयु
ष्करं प्रीतिकरं श्रीकरं च यशस्करम् एतस्माद
परं देवि न भूतं न भविष्यति एतदेव परं सारं
वेति सारविदो विदुः एतदेव परं धर्म्यं चेति ध
र्मविदो विदुः सर्वैश्वर्यप्रदं लोके सर्वसंपम
वेश्वरि गुह्यं गुह्यतमं लोके चेत्याज्ञा पारमेश्वरी
इति श्री रुद्रयामले तन्त्रे देव्या विद्यारहस्ये श्रीश्री
विद्या शाकारादि नाम सहस्रस्तवराजः समाप्तः
शुभम् ॥

ॐ नमस्त्रिपुरसुंदर्यै ॐ अस्य श्रीत्रिपुरसुंदरीतत्वविद्या
स्तोत्रमंत्रस्य श्रीदक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्रीम
हात्रिपुरसुंदरी देवता ऐं बीजं सौः शक्तिः क्लीं कीलकं
श्रीभक्तिसाधनार्थे तत्वस्तवपाठे विनियोगः अथध्या
नम् बालार्कमंडलाभासं चतुर्बाहुं त्रिलोचनां पाशांकु
शशरांश्चापं धारयंतीं शिवां भजे लक्ष्मीबीजंबीजवा
ऐं कमौलिं मंत्री नित्यं योजयेद्भक्तिपूर्वं जित्वा शत्रू
न्निर्भयः साधकेंद्रः कुर्याद्राज्यं देवियावद्रविःखे १
मायाबीजं योजयेद्देव नित्यं भक्त्योपेतं वीतरागो मनु
ष्यः भुक्त्वा भोगान्साधको विश्वमातर्जीवन्मुक्तो या।
ति त्वद्धाम सद्यः २ कामार्णं ते शुक्लरूपं जपेद्यो मं
त्री रात्रौ प्रेतगेहे प्रभाते विष्णुः जिष्णुः शंभुरंभोजयो
निः नत्वा नत्वा सेविते तत्पदाब्जे ३ श्रीवाग्भवं ते हृ।
दि संजपेद्यो प्रभातकालेप्यनिशीथकाले विमानमा
रुह्य स याति स्वर्गं रंभोर्वशीचामरवीज्यमानः ४
शक्तिबीजमिति ते शिवमातर्यो जपेन्नवमनो निशासु।
खे दासतां भजंति तस्य निकेते वासवो नरपतेः क
थैव का ५ ॐकारबीजमनघं यदि साधकेंद्रो ध्याये
न्महेशि हृदये तव मंत्रमध्ये त्रैलोक्यवामनयनाश्च
रणौ तदीयौ सीमंतरत्नकिरणै रनुरंजयंति ६

स्तो॰ भूतिवीजममलंहरिनिभं साधकोयदिचतुष्टयेज
१ पेत् आजिमंडलगतोविपक्षजिनां स्तान्विजित्यस्वगृ
हेसुखीभवेत् ७ रमावीजमाद्यंसितंयोजयेत्
महेशिप्रभातेनरोनान्यचेता: तदातस्यलक्ष्मी:
स्वयंतद्गृहेतु भजेद्दासतांवासवोमानवेंद्र: ८
त्रिकूटेतितत्त्वंसदासर्वकाले जपेत्साधकोयस्त्रिदे
वस्वरूप: ऽहस्याद्धरामा:पति:सार्वभौम: पर
त्रप्रयातिगृहेतावकीने ९ शक्त्यर्णमेतेनवय:
प्रभाते जपेच्छिवेरक्तमनंतवीर्यं स्त्रीणांपुर:।
कामइवापर:स्या द्भवेन्नृपाणामपिचक्रवर्ती १०
वासनार्णमसृतैकनिधाने योजपेदुमसिवा
दिनत्रये तस्यसाधकपते:पुर:शिवे शत्रु।
वोनहिभवंतिसंमुखा: ११ कामराजमसिते
तरूपं साधकोयस्तुजपेन्निशिमान: याति
स्वर्गमपिरूढविमाने क्रीडतिस्मपरिरभ्य।
मेनका १२ मायार्णमीशेभुवनैकसाध्य मा
द्यंजपेद्योमदिरैकपात्रे ससाधकोवैविधिव
त्रिलोक्यां यथास्वयंदेवपति:महेश: १३
रमार्णरक्ताभंकनकशिखवत्कारमनघं ज
पेन्मातर्मंत्रीनवभवनसौंदर्यसहितं प्रपणा

नैमूर्त्येवास्मरतियदिशृंगाटकपथे भवेत्तस्यो
मंत्री त्रिभुवनपतिः त्र्यंबकइव १४ इतिश्रीत्रि
पुरसुंदर्याः स्तोत्रं श्रीमंत्रविग्रहं रहस्यमेव सर्व
वस्वं गोपनीयं महेश्वरि इतिश्रीत्रिपुरसुंदरी
स्तोत्रं समाप्तम् ॥

